। — ५१८६.

म — , कात्यायन सूत्र व्याख्यानं

कर्ता — श्री याज्ञिकदेवः

पत्र. सं. १३६ सं. ×

विषय. — सूत्र पद्धति परिशिष्टं

पंचविंशति

पत्रे १३७

अ २५
१

ॐ नमो श्रीमहागणपतये नमः आचार्येणाध्वर्युवेदविहिता
नि पौर्णमासादीनि पित्र्यमेधान्तानि निस्सांगोपेतानि कर्म्माण्युक्तानि।
तदनंतरमुद्गातृवेदविहितान्येकाहाहीनसत्राणि वाद्दानीन्तेश्च वकर्म्म
सु विहितान्यथाकरणादोषनिहृत्यर्थानि नैमित्तिकांगानि प्रायश्चित्तापर
पर्यायाणि वक्तुं पूर्वं तेषामनुष्ठानप्रकारमाह कर्म्मोपघाते प्रायश्चित्तं त
त्कालं क्रियत इति कर्मतत्स्योपघातो विनाशो न्यैषां विहितादन्यथा कर
णमिति यावत्तच्चतुर्विधः अकरणं न्यूनकरणमितिरिक्तकरणमयथा
करणं चेति तत्रास्यान्वाधानरूपान्नोपधानादेः स्वरूपतो यदनिष्पादनं
तदकरणं आग्नेयपुरोडाशेष्टाकपालमध्ये एकस्यानुपधाने कपालोपधा
नपदार्थस्य न्यूनकरणं तत्रैव नवमस्योपधानमतिरिक्तकरणं अष्टानाम
पि कपालानां व्युत्क्रमेण वा ऽमन्त्रकं वा उपधानमयथाकरणं अथवा सर्व
प्रकारमप्यदमयथाकरणमेव। तस्मिन्कर्म्मोपघाते सति तत्कालं प्राय
श्चित्तं भवति प्रायो विनाशः विध्यतिक्रमजनितो दोषः कथं पापमुपवि
ष्टः विनाशं कर्तुं भात्मन उपविष्ट इति ज्ञायते चित्तासंज्ञानं तस्य धातोश्चि
त्तं अनेकार्थत्वाद्धातोः संधानं वित्तमित्युच्यते प्रायस्य चित्तं प्रायश्चित्तं वि २

नष्टस्य कर्म्मणः संधानमित्यर्थः प्रायश्चित्तयोः सुज्ञानमोलक्षणानताम
कर्म्मविनाशकालत्वएवकालोयस्य तत्तत्कालं यस्मिन्काले कर्म्मणोविहिता
न्यथाभावो जायते तस्मिन्नेवकालेतदन्यथाभावनिमित्तं प्रायश्चित्तं भव
तीत्यर्थः कुतएतत् पृषदाज्यस्कंदने जुहुयात् यद्यर्मभेदे परमेष्ठ्यादौ अप्सुजुहि
द्धः शतं जुहोति स्रुक्स्रावभेदनादिनिमित्तहोमे भेदनस्कंदनादीनामपूर्त्तानां हो
मात्प्रयानुपपत्तेर्निमित्तत्वावगमात् होमादीनां च नैमित्तिकत्वात् भेदनादि
निमित्तकालनैवयुक्तेवसिद्धांतमुक्त्वा अंतरा पूर्वपक्षमाह चोदनावाऽ
कालशास्त्रात् वाशब्दः पक्षव्यावृत्तौ पृषदाज्यस्कंदने जुहुयादित्यादिनैमि
त्तिकस्य चोदनैवविधानमात्रमेव न स्कंदनकालविशिष्टनैमित्तिकविधिः क
स्मात् अकालशास्त्रात् न हि पृषदाज्यस्कंदने जुहुयादित्यादिषु वाक्येषु का
लवाचकः शब्दः श्रूयते स्कंदनकाले भेदनकाल इत्येवं ततश्चांगत्वेनाप्यविहि
तकालानामंगानामंते निवेशो भवतीति न्यायेन कर्मणोंते नैमित्तिकं प्राप्नो
ति एवं पूर्वपक्षे कृते पुनः क्रमेण सिद्धांतं स्थापयति कालो वा प्रत्ययात् वाश
ब्दः पूर्वपक्षनिरासार्थः निमित्तकाल एव नैमित्तिकस्य स्यात् कस्मात् प्रत्ययात् य
द्यपि वाक्ये मध्ये कालः श्रुतो नास्ति तथापि प्रतीयते ज्ञायते कथमिति चेत् उ

च्यते । स्कंदने जुहुयाद्भेदने जुहुयादिति । यमधिकरणे सप्तमी तत्र च
२ द्धिपमुक्तं तं हरिणा वैषयिकमौपश्लेषिकं सामीप्यकमौपचारिकं नैमि
त्तिकमभिव्यापकं चेति । नैमित्तमेव नैमित्तिकं तत्रेयं सप्तमी । अन्यस्या
र्थस्यासंभवात् । तेन स्कंदनिमित्तं भेदननिमित्तं जुहुयादित्यर्थः । त
तश्च भेदनादि निमित्तमेव नैमित्तिकस्यानुष्ठापकं न तद्व्यतिरिक्तं किंचित्
2 न हि वेदविहितोपि परमेष्ठ्यादिहोमो निमित्तं विना कर्मणोऽन्तरमध्येवानु
ष्ठीयते । तेन निमित्तमनुष्ठापकमुत्पन्नं सत्तत्कालमेव नैमित्तमनुष्ठापय
ति यस्मिन्निमित्ते सति इदं कर्त्तव्यमिति प्रतीयते यदा च यत्कर्त्तव्यं प्रतीय
ते तदेव तदनुष्ठीयतइति प्रतीयते नैमित्तिकस्य निमित्तकालता तस्मात्स
धूक्तं तत्कालमिति । तथा च शांखायनः । अनंतरं होतास्याप्रायश्चित्तं तत्सनि
दं ते दोषप्रवृत्तिस्तूत्तरस्यास्तीति । तेन वचनेन विना निमित्तोत्पत्तिकाल एव
नैमित्तिकं भवव्वने नान्यस्मिन्नपि काले भवति यथा द्विभेदने माह । तेन ब्रह्म
सामन्वारभेत्तिति यथा चकलशभेदने वषट्कारनिधनं ब्रह्मसाम्ने भिषकु
र्मीयपात्रेऽत्यन्तरतन्त्रेषु मीयपात्रमहयात्सु हेषसंबंधिन्युपपात्र विहिता
नां गेहेऽग्नये क्षामवात्ते भार्यागो युग्मजनने माह । तं त्वतोदशकपालं निर्वपेद् २

निष्ठाग्न्यग्नौ न नवस्थाश्रीयादिस्याहोनाय इत्याय शुनासोमेनेत्यादि
वावगवगन्नयो स्समा सादि कालएवानुष्ठानं नतत्कालं जा तत्र सर्वनिमित्ते
षु नैमित्तिकांतरस्यानुक्तौ साधारणं नैमित्तिकमाह महाव्याहृतिहोमे
नादेशो कर्मो यथा तद्दस्यनुवर्तते। कर्मोपयातेने नैमित्तिकांतरस्यानादेशेनु
क्तौ महाव्याहृतिहोमो नैमित्तिकं भवति। महाव्याहृतिभिर्होमो महाव्याहृ
तिहोमः। तद्यथाग्निहोत्रे कूर्चेनिधानपरिस्तरणादिकं विहितमस्ति। तद्वकर
णं दैवनिमित्तिकमुक्तं नास्ति अतस्तद्वकरणे दोमहाव्याहृतिभिर्होमो भ
वति भूर्भुवः स्वरित्येता महाव्याहृतिसंज्ञा इत्युक्तं सर्वानुक्रमण्यां। भूर्भुवः
स्वरिति स्तो महाव्याहृतयोग्निवायुसूर्यदेवत्याः क्रमेणेति। यत्र पुनर्निमित्तमु
द्दिश्य नैमित्तिकांतरस्योपदेशो भवति। यथा दर्पदाज्यस्कंदने जुहुयाद्द्या
विष्ठेति। यथा स्कंदेवेद्रप्सं त्वधिनिमाजनीत्यभिम्रशेदिति। तत्र महाव्याहृ
तिभिर्होमो न भवति। अनादेश इत्युक्तत्वात्। मुंडकमेवमहाव्याहृतिहोमं
निमित्तविशेषे शेषयथाशक्तिविभजते होत्रिके भूरितिगार्हपत्ये। हो
त्रिहोतवेदसंबंधिन्युपपातेऽन्वेदविहितकर्मणो विनाशे नैमित्तिकां
तरस्यानादेशे भूरितिमंत्रेण गार्हपत्येऽग्नौ जुहुयात्। अत्र स्वाहेत्यध्या

देवपा अ २५ हारः। स्वाहाकारः। सर्वत्र साकांक्षत्वाद्विस्मृतेः। अत्राग्निर्देवतास्ति होवा
३ च यथा कोभूरिति चतुर्गृहीतमाज्यं गृहीत्वा गार्हपत्ये जुहवथेति स्मरणात्।
अयमनादिष्टहोमोपयकर्मणोब्रह्मा भवति तत्र ब्रह्मणा कर्तव्यः। ब्रह्म
वरणाप्राक्छिद्रिभिन्ने जाते व्याहृति होमार्थं ब्रह्मणोवरणंसमन्त्रकं तत्ता
नेन होमः कोरयितव्यः। यत्रे ब्रह्मा न सर्वत्याग्निहोत्रादौ तत्र तत्कर्तृकैर्वक्ता
र्येः। सोमे चक्रात्वाहुतिभिरस्यसमुच्चयः अवांतरकर्मभेदात्। उभयोरप्य
नादिष्टत्वात्। प्रायश्चित्तेषु दोषनाशादि त्वत्र प्रायश्चित्तसमुच्चयस्यात्
त्वाच्चायथाचापस्तंबः। एकस्मिन्दोषे श्रूयमाणानि प्रायश्चित्तानि समु
च्चीयेरन्नर्थान्तरत्वाज्जुयोहोमद्रव्या चेति॥ ॥दक्षिणाग्नावाध्वर्यवे नुवद्द
ति। आध्वर्यवे अध्वर्युवेदविहितकर्मणोविनाशे नैमित्तिकां तस्मारेना
देशे भुवद्दति मंत्रेण दक्षिणाग्नौ जुहुयात्। यदिय जुष्टो भुवद्दति चतुर्गृही
तमाज्यं गृहीत्वाग्नीध्रीये जुहवथा न्वाहार्यपचने वाहविर्यज्ञे इति स्मृतेः।
अत्रापि स्वाहेत्यध्याहारो वायुर्देवता। अत्र गार्हपत्यानुगमनादावप्यना
दिष्टप्रायश्चित्तं भवतीति कारिकायां आग्नीध्रीये सोमो सोमेष्वाति ष्टोमादौ
सोमयागे आध्वर्यवेउपस्थाने आग्नीध्रीयोत्पत्त्यनंतरं भुवद्दत्याग्नीध्रीये ३

होतव्यावृत्यन्तेः प्राक् दक्षिणाग्नावेवाननन्तदर्थमाग्नीध्रीयोत्पत्तिः स्व
रिष्टोहोमात्र आहवनीये अग्नौ तेसाम वेदविहितकर्मणोविनाशे प्रायश्चि
त्तात रस्यानादेशे स्वरित्यनेन मंत्रेणाहवनीयेव्रहोति। यदिग्नामतः स्वरिति
।यं दिसां चतुर्गृहीतमाज्यं गृहीत्वाहवनीये जुहवथेति श्रुतेः। अत्र सर्वे देव
ता। अत्रापि स्वाहेत्यध्याहारः॥ ॥चतुर्गृहीतान्येतानि सर्वत्राण्येतानीत्याज्या
नि इत्यर्थः। नस्वाहेत्यायुक्तेषु व्याहृति होमेष्वाज्यानि चतुर्गृहीतानि नवे
युः। एतेषु नैमित्तिकेषु चतुर्गृहीतमाज्यं गृहीत्वा होतव्यमित्यर्थः। अवि
ज्ञाते प्रतिमहाव्याहृतिसर्वाभिश्चतुर्थमितिवक्ष्यति। तत्रापि चतुर्गृहीतान्ये
वाज्यानि यथा स्युरित्येवमर्थं सर्वत्रेति। तत्राज्यानीति कुतः। भूरिति चतु
र्गृहीतमाज्यं गृहीत्वेत्यादि श्रुतेः। सूत्रेषु घृतमाज्ये लिंगात्तस्य होमानादेशे
तु स्वनया परिभाषया द्रव्यान्तरस्यानादेशे आज्यं आज्यस्य होमद्रव्यस्योक्त
त्वात्। तस्याज्यं प्रसंगादिष्वाद्यर्थं संस्कृतमनपहृतं चेत्तदेव प्रायश्चित्तहो
मोपि ग्राह्यं। असंस्कृतमपहृतं चेत्पूर्णाहुतिविधिना संस्कृत्य होतव्यं। स्रुक्स्रु
वयोरप्येकमेवात्र। विधिमपि पत्तिः। हरिस्वामिमाते जुहूः। तथा शांखायनः
।आहवनीयः सर्वाहुतीनां जुहूः स्रुवः पात्रं चतुर्गृहीतं प्रायश्चित्ते विविः कर्क

देव अ २५ मतेग्निहोत्रहवनाय्यं। आद्ये विप्रतिपत्तिः। हरिस्वामिमते प्रकृतकर्मणि
४ यत्संस्कृतं तद्दैवनैमित्तिकहोमेपि भवति। कर्कमते त्वन्यदेवाज्यं संस्कृत्य प्रा
यश्चित्तसर्वत्रहोतव्यं। नान्यार्थसंस्कृतेनाज्येन कर्मापवर्गे प्रायश्चित्तमुक्तं
। तत्र कर्मार्द्धे विधा। सन्निपत्योपकारकमारादुपकारकं च। तत्र आरादुपकारा
कार्येण उच्यते। अदृष्टार्थत्वपक्षे प्रणीताप्रणयनं। कुकुदाहननं स्फोटकप्रह
रणं पूर्वाघाराजलिकरणो तु आघार प्रयाजाज्यभागानुयाजपत्नीसंयाजद
क्षिणाग्निहोमपूर्णपात्रनिनयनाद्याहवनीयोपस्थानान्तं ब्राह्मणतर्पण
कर्मापवर्गश्चेत्येतान्यारादुपकारकाणि। एभ्योन्यानि सन्निपत्योपकारका
णि। तत्रारादुपकारकपदार्थस्याकरणेऽनादिष्टहोमपूर्वकं तस्य करणं प्रा
क्कर्मसमाप्तेः अकाले च तु तस्य कर्मानुग्रहार्थं पुनरावृत्तिर्न भवति। तदुक्तं
वठसत्रे। प्राक्तो लाकृतं कर्म नावर्त्तयेदं तरितं प्राक्समापनात्तु यदिति। मान
वेपि। कर्मान्तरितं तु पीन्संस्कारान्तरे प्रायश्चित्तमेव जुहुयात्तदूर्ध्वमावृत्तौ सहे मंत्रमा
नयेत्तस्मीवेति। अत्राह रोठेकाकारः। अहतकार्याणां चाहवनीयस्तरपरिधि
पुरोडाशादीनां कृतसंस्काराणामपि नाशदोषापहारे चान्येषामुत्पादितानां सं
स्कारावृत्तिर्भवतीति सन्निपत्योपकारकस्याकरणे वाध्वर्यव पूर्वकं तस्य कर

णो वाध्वर्यवपूर्वकं तस्य करणमेतेन दुष्कार्यद्रव्यादेरकृतत्व कार्यस्य स
द्भावात् । तदुक्तं निदानसूत्रे । अंगमपरिसमाप्य प्रधाने क्रियते परिसमा
प्ते तु न कर्तव्यं तदुपकारार्थत्वाद्द्रव्यसंस्कारकृष्णमुपयुक्ते द्रव्ये लुप्यते तदर्थ
त्वाद्दंतरिन प्रायश्चित्तं तु दृश्यते । संस्कारलोपान्नस्वं रिक्थे न प्रधानेषु दृष्टं
तु सं तस्याप्यर्थे इति । तथा देवतावदानयाज्यानुवाक्यामंत्रकर्मविप
र्यासे नाम्नात प्रायश्चित्तानां चापदि त्वं नः सत्वं नो या अग्न इत्येताभिर्जुहु
यात् । व्याहृतिभिश्चाकालेवाचं विसृजेत् सर्वे सर्वा निराघपुनर्यच्छेदिति काठके
च । मंत्रांतरे कर्मविपर्यासे वा लंनो अग्न इति द्वाभ्यां जुहुयादिति आपस्तंबः । ए
कस्मिन्नेषे श्रूयमाणानि प्रायश्चित्तानि समुच्चीयेरन् जयो होमस्याचेति ।
मानवे । अस्मा प्रायश्चित्तानि स्रुवेण जुहोति तत्रो भूःस्वाहेति दक्षिणाग्नौ सा
मनः स्वस्वाहेति आहवनीये सर्वतो भूर्भुवः स्वःस्वाहेत्याहवनीय एवेति ।
अत्र भस्म केव प्रायश्चित्त होमतंत्र । तेन त्कगसंभवे बह्वास्यासंभवे वकदाचि
त्त्कवेणाप्येकामूरित्या घाहुतिहेति व्या । अकरणच्छिंद्यानरस्यापि श्रो
ष्ठेत्यात् । सर्वप्रायश्चित्तं च पंचभिः प्रत्यवे । व्याहृतिहोमानंतरं वक्ष्यमा
णाभिः पंचभिर्ऋग्भिः प्रत्यवे सर्वप्रायश्चित्तं जुहोति । एके कयाज्ञवाए वेका

ऐत्र अ२५ माहुतिं जुहोतीत्यर्थः। सप्रायश्चित्तमिति संज्ञाकरणं सर्वप्रायश्चित्तं
५ चेत्यादौ संव्यवहारार्थं। चकारात्सर्वत्र सर्वेषु हौत्रिकाध्वर्यवोक्तान्ते रूप
पातेषु व्याहृतिहोमानन्तरं। अथवा सर्वत्रेत्यस्यानुवर्त्तनेनैव चकारात्सर्वे
प्रायश्चित्तमपि चतुर्गृहीतेनैवाज्येन होतव्यं। तथा च शांखायनः चतुर्गृही
तं प्रायश्चित्तेष्विति। अस्य च होमस्याहवनीये कार्यः। आहवनीयहोमा
इत्युक्तत्वात्। चकारेण चतुर्गृहीतानामपकर्षेण पक्षे सकृद्गृहीतेन होमः
पंचभिरित्युक्तं। तांश्च आह। त्वं नो अग्न इति द्वाभ्यां स त्वं नो
न्त इति द्वाभ्यां द्वाभ्यामाद्ये आहुती जुहोति अत्र मंत्रवर्णो देवाग्नीवरु
णौ देवता। अयाश्चाग्न इति। अनेन मंत्रेण तृतीयामाहुतिं जुहुयात्। अ
त्र मंत्रवर्णो इदमग्नये अयास इति त्यागस्त्वान्तरीयत्वात्सकलमंत्रपाठः
ये ते शतमिति। अनेन मंत्रेण चतुर्थीमाहुतिं जुहुयात् अत्र इदं वरुणा
य सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः इति त्यागः। उदुत्तम
मिति च। अनेन मंत्रेण चकारात्पंचमीमाहुतिं जुहोति। अत्रेदं वरुणा
येति त्यागः। एतत् द्वाहुतिपंचकं सर्वप्रायश्चित्तसंज्ञं अविज्ञाते प्रतिमहा
व्याहृतिसर्वाभिश्चतुर्थी. सर्वप्रायश्चित्तं वा यन्न ज्ञायते किमिह मार्ग्वेदि ५

वं मुनयाजुर्वैदिकमुनसामवेदिकम् इति यथा यज्ञोपवीतिना बद्धशि
खिना दक्षिणेन पाणिना पवित्रपाणिना कर्म कर्तव्यमित्येवमादिति दृवि
ज्ञानमुच्यते तस्मिन्नविज्ञाते अविज्ञातवेदविशेषमन्त्रे स्मृतिविहितस्य
कर्मणो विनाशे प्रतिमहाव्याहृति हुत्वा महाव्याहृति महाव्याहृति प्र
ति प्रतिमहाव्याहृति आहुतित्रयं हुत्वा सर्वाभिर्महाव्याहृतिभिः श्व भूर्भुवः
स्वः स्वाहेत्येवं चतुर्थीमाहुतिं जुहुयात्। ततः पूर्वोक्तं सर्वप्रायश्चित्तं च त्वं
न्न इत्यादिभिः पंचभिर्मन्त्रैर्जुहुयात्। अत्रापि प्रतिपत्तिः। भूरिति गार्हप
त्ये भुव इति दक्षिणाग्नौ स्वरिति स्वाहा भूः भुवः स्वरिति सर्वप्रायश्चित्तं च
माहवनीय इति याज्ञिकाः वासुदेवभट्टास्तु नेति व्याघ्राहुतिनवकम् आ
हवनीय एवेति संप्रदायकारिकाकारो सर्वाभिश्चतुर्थमित्यस्मिन्होमे इ
दं प्रजापतय इति त्यागः समस्तानां प्रजापतिरिति स्मरणात्। यद्यु अ
विज्ञातमसत्सर्वा एष जुहुस आहवनीये जुहवयेति श्रुते श्चतुर्थस्यानिष्ट
येनाहवनीये होमः। महापितृयज्ञे च यज्ञोपवीतत्वावसरे निमित्ते जाते
नैमित्तिके होमोपि यज्ञोपवीतिना कार्यः। प्राचीनावीतित्वावसरे वप्रा
चीनावीतिना कार्यः। मन्त्रवभुवइति होमः स्वन्तः सत्वन्न इत्यादिस

अदेवृ २५
६

र्थं प्रायश्चित्तहोमस्स्याद्दक्षिणाग्नावेव कार्यः। दक्षिणाग्निराहवनीयव
दित्यनेनाहवनीयकार्यं स्याद्दक्षिणाग्नौ विधानात्। अत्र वमत्थे चाश्वेव
सर्वप्रायश्चित्तहोमः। शान्तद्विये च परिशिष्टे तु। अंबकासु यतुष्टया
ग्नौ। आश्वलायनः। सर्वत्राविज्ञाते वा भूर्भुवः स्वरित्याहवनीय एवेति
सर्वत्र हुतिर्यदि युगपत्सर्वे ये दस्संवधिषिकिं चिच्छिन्नं भवतीति। नदापि
भूर्भुवस्स्वरित्याहवनीये होमः। अविज्ञाते चानुवहुतिहोमस्तु। अवस
थ्ये दक्षिणाग्नावेव। अग्निहोत्री चेदुहानोपविशेद्यजुषोच्छापन
मेकउदस्थाहेव्यादितिरायुर्यज्ञपतावधादिडा यक्षस्तएवतीभागं मित्रापव
ग्रणाय चेति। अग्निहोत्रशब्देनाग्निहोत्रसाधनं पयोऽभिधीयते नयस्मा
गविविद्यते। सेयमग्निहोत्री। अत्रेतिप्रत्ययलोपश्छांदसः। सा अग्निहो
त्री गौश्चेद्यदि दुह्यमाना सती उपविशेदुपवेशनं कुर्यात्तदा तस्या उपवि
ष्टाया गौरेकेनाचार्याद्‌दस्थादेव्यादितिरितियजुषोच्छापनं कुर्यादित्या
हुः। तदाहुर्यस्याग्निहोत्री दोह्यमानोपविशेदितिप्रक्रम्य तां हैके यजुषो
च्छापयन्त्युदस्थाहेव्यादितिरिति भ्रान्तेः दुग्ध्वा ब्राह्मणाय दद्यादयमन
स्यागमिष्यं तस्याला एवं यजुषोच्छापनतागामग्निहोत्र्या यदुग्ध्वा तत्तएनां ६

दुह्यमानोपविष्टा तस्मै ब्राह्मणाय दद्यात्। अयं ब्राह्मणो मन्यागमिष्य
न्स्यात्। अत्र मतभेदः यः पुनर्गृहे नागच्छति तस्मै दद्यादिति कोरिका
कारः। यस्य गृहे कार्यार्थमपि गमिष्यन्यजमानो न भवति तस्मै दद्याद्
इति यज्ञिकः। धूर्तस्वामिनस्तु हि यथा यथा दद्यादिति विशेषो लोपनः। यस्मा
त्तेनायात्तस्मै न दद्यादिति मानवे। आश्वलायनः दुग्ध्वा ब्राह्मणे पाययेय
स्याभो ह्यं न स्याद्यावज्जीवं संवत्सरं वेति। तथा। यस्याग्निहोत्रमपावस
ष्टा दुह्यमाना स्यन्देत सा यत्तत्स्कं दे जदभिमृश्य जपेद्यद्य दुग्धं पृथिवी
मसृप्त यदोषधीरत्यसृपद्यदपः पयो गृहेषु पयो अघ्न्यायां पयो वत्से
षु पयोऽस्तु तन्मयीत्स यत्परिशिष्टं स्यात्तेन जुहुयादन्येन वाभ्यानीय
ति पक्षान्तरमाह दंडेन वानुषिञ्च्योच्छाप्य दोहनं। वा अथवा दंडेन
लकुटेनानुषिञ्च्य जघनप्रदेशे ताडयित्वा तूष्णीमेवोच्छाप्याग्निहो
त्रार्थं दोहनं कार्यं। इच्छमेव कुर्यात् दंडेनैवेनां विपिष्योच्छापयेदिति शङ्ख
नेः। अस्मिन्नष्टे विशेषमाह अदानं चान्तस्याद्दुह्यमानोपविष्टा
यादंडेनानुषिञ्च्योच्छापितायागोरदानं। दानं न भवति। अदुहानाया
मन्त्र॥ होमार्थं दुह्यमानायां गव्यदुहानायां पादाद्यान्तादेर्दोहप्रतिकू

देवब्पअ२५ लमाचरंत्यां सत्यां सन्यागां दोहयेत्। न नु प्रसूता या गौः रदोहेऽस्मादो
हनमासमेव। अर्थद्वयविरोधे यज्ञमान्यास्मिन्नने न्याये न किमर्थं पुन
रिदमुच्यते। प्रायश्चित्तकथासार्थद्वयं दोषः। तयनः प्रसूता या गौः रदोहे
स सुप्रपन्नत्वाद नादिष्टहोमः प्रायो मन्यस्या दोहनं च। अनन्तुभयोः प्रा
प्तो सत्यां एकस्यो पादानमितरनिवृत्त्यर्थं भवति। वा श्येन च ह्य एगोऽन्यालु
प्यन्तासमेसस्यवसादिति। अग्निनीर्दुहाने स्नुवर्जते। अग्निहोत्रिणा
दुहानाहेत्युमानासतीचेद्यदिवा श्येनाग्नाज्युर्यात्। अग्निहोत्रीं दुहा
नेत्यनुवर्तनोतदा तल्लोन्युलुप्याच्छिघन्यासयत्यर्थ श्येनासस्यवसादि
त्यनेनमंत्रेणानलाहुर्यस्याग्निहोत्री दोत्युमाना वा श्येनेतिप्रकृतस्यार
बमाच्छिघन्यासयेदिति श्रुतेः मन्त्रस्य समस्तस्य पाठः स्वशाखोयामस
त्वात्। तस्मै पयसा जुहोति पष्ठ्यर्थे चतुर्थी तस्माद्दोहनकाले शाहृं त
नवत्यागोः पयसा दुग्धेन जुहोति। प्रायश्चित्तविधानेदुग्धमेनदि तिम
त्वनपरित्यजति। लोहितादोहेदक्षिणाग्निं परिश्रित्य व्युत्क्राममनेसुकृतो से
नस्मनिरुद्धायहत्वा पूर्ववदुद्धानं। गोदेहे त्रि यमाणो लोहितं दोहे स्नन्नेभ्यो
लोहितसर्वं गोदक्षिणाग्निं परिश्रित्य परितः सर्वासु दिक्षु कठ वस्मादि

नाहृत्न तूत्वा व्युत्क्रामतेति प्रैषमुक्त्वा दक्षिणाग्नेरेवोल्मे भस्म निरूह्याय
हुत्वा न स्थले हितस्य रुद्राय होमं नत्वा पूर्ववत्तस्या लोहितदोहिन्या गोर्द्
नं कुर्यात्। पूर्ववदिति यमनन्याग्निष्वनस्यागुं न्समीपं गमिष्यं न्तां भव
ति तस्मै दद्यादित्यर्थः। अत्र च मेक्षणोकरणं सेवदानं श्रपणं च सत्रवका
रेण संगृहीतमपि श्रुत्युक्तत्वात् क्रियते। तत्राद्यं पदार्थो क्रमः व्युत्क्राम
तेति प्रैषः। मेक्षणस्योपकल्पनं। अन्वाहार्यपचनं परिश्रयितवाइति
प्रैषः। अन्यस्य प्रेषितस्य परिश्रितकरणं। दक्षिणाग्नौ तस्य लोहितस्य
दुग्धस्याधिश्रयणं। मेक्षणेन तस्यालुलनं। श्रपयित्वा हुत्वाद्दक्षिणाग्ने
रेवडल्ले भस्मनि दोहहनेनैव रुद्राय स्वाहेति होमः। उदकोपः इदं रुद्रायेति
त्यागः। अनेनादृष्टेनाग्निहोत्रहोमः। तस्या रुधिरदोहिन्या गोस्तस्मै
ब्राह्मणाय प्रदानं यं प्रतिनगच्छेत्। अक्रान्तो तु दक्षिणाग्नावेव तत्स्थालीहोमा। उक्
क्रान्तो तु दक्षिणाग्नावेवतत्स्थालीहोमं तु केः तस्मिन्नेत तच्छुपयित्वा तस्मिन्नुल्
स्मी जुहुयादिति होमस्यांगविसर्जनं दोहनं। दोहस्य होमद्रव्यस्य गविसर्जि
तमेव संतत्स्वभावात्क्रमणमेव क्षणोदिनामदि बुधदृष्टं भवेत्। तद्दो
रोहनं रुद्रदेवतं भवति। इतः प्रजानिसर्वे भुनि गिनेषु विनष्टस्य पयसो होम

देव पा अ २५
८

8

तिदेशं चोवक्ष्यति। नयथाकालो पपाते न देवतेत दैवतं। हुत्वात ह्यति
दिश्रुतो न्येन जुयादिति। तेनात्र गविशिष्ट तस्य होमासंभवादुद्देन तेपयद
स्यदिति देशा एव भवतिरोहत्वाज्ञापामुपस्पर्शनं   उपस्थ्वायायच्छं वत्स
स्यगो स्तनंसंबंधावसरे गविशिष्टं नेयदिशप्रभान्नमरणामे ध्यतक्षरणादि
नादुष्यतितदावा पकांवायुदेवस्वंपयोभवति। तदपिहोमासंभवाद्धा
यवैत तेपयद्दस्यतिदेशएवभवति   दुह्यमानमाश्रितं दुह्यमानं स्तनान्निः
काश्यमानं पदिविनश्यतितदा आश्रितमश्रितं देवतं भवति। अत्र चो
भयं संभवति। अतो दोहनेनैवाहवनीये श्रितमभ्यांस्याहेति होमो श्रितनावे
तद्धां पयद्दस्यतिदेशोव॥ पात्रस्थस्यैवा अथवा गार्हपत्याद्दुग्धं भस्मा हृत्य
हाथं कुचातस्मिन्भुवस्यतितत्पयस्तां स्मां निनयेत्। तत्रस्त्यापर्यायो निन
येत्। इदुमेववर्षीह्यार्हपत्याद्दुग्धं भस्मानिरूह्यतस्मिन्नेतद्दुग्धं भस्मा
नूस्मां निनयेत अभिरूपनिनयतीतिश्रुतेः। एतत्सव सत्रकारेणानोपनि
बद्धं। श्रुतितत्त एवमुखेन प्रतीते। ततो न्येन श्रुद्धमपयसाग्निहोत्रं जुहु
यात्   हुत्वाय सोम्यादुग्धं पयोधिश्रयणस्याप्यदादुष्यतितदा सोम
सोमदेवत्यंस्यात्। तदा दोहनेनैव सोमाय स्वाहेत्याहवनीये जुहुया ८

तु। अथ वा सोमेन तन्ते पयद्दृति पात्रे स्यस्येवातिदेशः। अस्थ्य वाश्मसुक्तं
प्रायश्चित्तं। ये धिष्ण्यपराणो र्थमंगाराउ नर नः कृता भवंति तानर सुस्पृते
षांच्छाने यदुस्मं भस्मत त्र तू स्मा। निनये तउपर्युदकं निनयेत्। तदाहुर्यस्या
ग्निहोत्रं दोहितमे ध्यमा मपद्येते किं तत्र कर्मका प्रायश्चित्तिरिति य एवै
तेंगारा निरूढाये ष धिष्ण्ये ष्वन्नवतितान्स लुप्य तस्मिन्नेन दुस्मे भस्म
न्तू स्मा। निनयेदभ्दिरुपनिनयतीति श्रुतेः। एतदपि सत्रे कृतानो निबद्धं
। अन्येन शुद्धेनाग्निहोत्रहोमः। स्वधिष्णिनेवाहरणो अन्ना वधिश्रितं पयो
दृ स्वं वारुणो वरुणो देवतं भवति तस्तदा न हूरणायस्वाहेति शंस्य जुहुयात्। वरु
णो नत्ते पयद् स्पिति देशो वा। अथ वाश्मसुक्तं येधिष्ण्यपराणोर्थं अंगारउ नर
नः कृता भवंति। तेषु वांगारेषु तद्दुग्धं। ग्धं तेनेव पात्रेणो तस्मात था जुहु
यात्। यथा जे गारस्तेन हूतेन तुल्येन शाम्यंति। तत उपर्यद्भिरभिसिंचेत्
। तदाहुर्यस्याग्निहोत्रम मधिश्रितं चिमेध्यमाय पद्येत लुपक्रम्य य एवैतेंगार
निरूढाये ष धिष्ण्ये श्रितं भवति। तेषु न तू स्मा जुहुयात् तदुत्तमहुतमभि स्या घभि
धायाद्भिरुपनिनयतीति श्रुतेः। एतदपि सत्रे कृतानोक्तं। ततः शुद्धेन पय
सा होमः। भरतं पोस्सं। उद्दतं तापेन रक्षा स्या मृद्धिंग छ तदुग्धं पो स्मं पृषदे

अ२५
देवभाष्य
१९

वत्यं स्यात्। ततश्च पूष्णे स्वाहेति शांस्ये होमः। पूषन्नेतत्ते पयः स्यादिति देशो
वा। विष्यंदमानं मारुतं। तु लक्षितमुपशान्तिं प्राप्तं च दुष्टं मारुतं मरुद्देवतं
भवति। ततश्च मरुद्भ्यः स्वाहेति होमो मरुत एतत्त एतद्वः पयः स्यादिति देशो
वा। सर्वजिन्येन शुद्धेन पयसाग्निहोत्रहोमो भवति। विंदुमत्सारस्वतं। विं
दवो स्यसंतीति बिंदुमद्दुपरिजातबुद्बुदं विनष्टं सारस्वतं सरस्वती देव
तं भवति। ततश्च सरस्वत्यै स्वाहेति होमः। सरस्वत्येतत्ते पयः स्यादिति देशो वा
शांतं मैत्रं। यदा विंदवो प्युपशांतास्तदा दुष्टं पयो मित्रदेवतं स्यात्। तत
तश्च मित्राय स्वाहेति होमो मित्र मित्रैतत्ते पयः स्यादिति देशो वा। उद्वास्यमानं
सवितुः। उद्वास्यमानं पयो विनष्टं सवितुः सवितृदेवत्यं भवति। ततश्च सवि
त्रे स्वाहेति होमः। सवितरेतत्ते पयः स्यादिति देशो वा। उद्वासितमदितेः। त्रिरुद्वा
सनोत्तरकालं विनष्टं पयो दितेरादितं देवतं स्यात्। ततश्चादित्यै स्वाहेति
होमः। अदित एतत्ते पयः स्यादिति देशो वा। उन्नीयमानं वैश्वदेवं। अग्निहो
त्रहवण्यां स्रुवेणोन्नीयमानं पयो विनष्टं वैश्वदेवं विश्वे देवा देवता तस्या
त्। ततश्च विश्वेभ्यो देवेभ्यः स्वाहेति होमो विश्वेदेवा एतद्वः पयः स्यादिति दे
शो वा। उन्नीतं बार्हस्पत्यं। स्रुचि गृहीतं दुष्टं पयो बृहस्पतिदेवतं स्यात्। तत

श्वबृहस्पतये स्वाहेति शंस्येहोमः। बृहस्पतन एतत्ते पयइस्यति देशो वा। अथवा
श्रुत्युक्तं। आहवनीये समिदाधानं कृत्वा आहवनीयादेवोस्मं भस्मापोह्य कृ
त्वा तस्मिन् भस्मा नितृस्मीतत्स्यपो निनयेदुपर्यग्निरूपसिंचेत्। तदाहवनी
स्याग्निहोत्रं। स्तू. च्युन्नीतममेध्यमापद्येते स्रुपक्रम्ये च्छमेव तूर्णीदाहवनी
येसमिधमभ्याधायाहवनीयादेवोस्मं भस्मनिरूह्य तस्मिन्नेतदुस्मं भस्मं तत्
स्मीनिनयेदग्निः रुपनिनयतीति श्रुतेः। एतदपि सूत्रकृतानोक्तं। अथवा
तेनैवहोमो न वै देवा इति श्रुतेः। प्रदीप्यस्यापणं धानं। प्रदीप्यमानेमाहवनी
यंप्रतिहोममयनीयमानं तु संपपो धानं धानदेवत्यं भवति। ततश्च धात्रे
स्वाहेतितस्य शंस्येहोमः। धानरेनत्तेपयइस्यतिदेशो वा। हृतं वै श्वकर्म
णो। आहवनीयं प्रतिनयनायोपक्रांतमद्भूतं क्रियति चमार्गे चाचलितमर्हमा
र्गात्प्रावृत्तिन संपपो वै श्वकर्मणं विश्वकर्मदेवतं भवति। ततश्च विश्वकर्मणे स्वा
हेतितस्यहोमो विश्वकर्मन्नेतत्तेपयइस्यतिदेशो वा। अंतराग्नी वैश्वानराय
प्रदूतं गार्हपत्याहवनीययोर्मध्यगतेपदावितत्कूयति तदा तद्वैश्वानरायहो
तव्यमिति देवंवा। ततश्च वैश्वानराय स्वाहेति होमः। वैश्वानरैतत्तेपयइस्यति
देशो वा। उन्नीतस्योपरि वर्षत्याद् दंसंम श्रोयस्करमिति ध्यानं। तेनैवपयसा हो

देवय्य अ २५ मः कार्यः। तदाहुर्यस्याग्निहोत्रं १-स्क- न्नीतमुपरिष्टाद्देवा वर्षेदित्युपक्रम्यते
२० न कामं जुहुयादिति श्रुतेः। एतदपि स्कन्नस्नान्नो जं उपसन्नं द्यावापृथिव्योऽउप
सन्नं होमायसमीपे प्राप्तं दुग्धं पयो द्यावापृथिव्योः संबंधि भवति। ततश्च द्यावा
पृथिवीभ्यां स्वाहेति होमः। द्यावापृथिव्या वेतद्दुग्धं पयद्रस्य स्यादिति देशो वा। काठके।
उन्नीतमवद्ग्रं समित्रो जनानीति समिधमाधाय तद्दुग्धा यान्याहुग्ध्या पुनर्जु
10 हुयादग्निहोत्रमुन्नीतं कोटावपन्नं हिरण्यगर्भ इति वल्मीकवपायामवनिना
यान्याहुग्ध्या पुनर्जुहुयादिति। तयापदि स्नातदुन्नीतं १-स्कं देहे द्विलिर्वानतद्रा
द्रियेन दाद्रियेत यद्युर्वे चतुर्थमुन्नीतं १-स्कं देष्कोल्यां द्रोणमवनीय चतुरस्युन्नी
य होतव्यमन्यया वा भिदोत्वासमिति पूर्वाहुतिरिंद्राग्न्यो। होमात्प्राग्विनष्टं
चेत्पयस्तदा पूर्वाहुतिरिन्द्राग्न्योः संबंधिनी भवति। ततश्चेन्द्राग्निभ्यां स्वाहे
ति होमः। इंद्राग्नी एतद्दुग्धं पयद्रस्य स्यादिति देशो वा। उत्तरा प्रजापतेः। प्राग्उत्तराहुते
र्यदा विनष्टं पयस्तदा उत्तराहुतिः प्रजापतेः संबंधिनी भवति ततश्च प्रजाप
तये स्वाहेति होमः प्रजापत एतत्ते पयद्रस्य स्यादिति देशो वा ततश्चानुगृहीते नोत्त
राहुति होमः तच्चानुगृहीतमन्येन केनचित्तस्मै यं गृहीत्वा अस्मै होत्रे आनीयस
यस्य येना यावक्ष्यमाणन्यायानुसारेण समाप्तं तस्य रुद्राय स्वाहेति होमः

रुं द्रे तत्रोपपद्यस्येति देशो वा दृश्यमान प्रभृति हन्तव्यं तस्यामेध्यम
लके शकटादिपातादिना विनाशः यथाकालोपपातेन देवतेन देव
तर्ष्टै हुत्वा तद्धान्ति दे व्यान्येन जुहुयात् यस्मिन्यस्मिन्काले होम्यं गविस
द्धो द्रमुपसंगे वा यव्यमित्यादि एवं त्रप्रतिपादितमुपपातो दुष्ट स्यवि
नाशे यथाकालोपपातः वीप्सार्थे यथा शब्दस्य समासः तयोः कालोप
यथा काले यथाकाले यस्मिन्यस्मिन्काले उपपातो यथाकालोपपातः त
स्मिन्यथाकालोपपाते तद्देवते रुद्रादिदेवतेन देवतं रुद्रादिदेवतं हुत्वा
रुद्रादिदेवतो देशेनाहवनीये तं तद्धुत्वं यो हुत्वा तद्धान्तिरिति दृश्य अथवा
तस्य यागादि दृश्य रुद्रे तत्रोपपद्य इत्यादिना प्रयोगे एतद्वक्ष्यामवगविच्छि
तं पात्रस्थितं वा तिदि दृश्यते स्वे देवतायै संकल्याने न तस्माद् ग्रोद न्येन शु
द्धेन पयसा जुहुयात् न नित्याग्निहोत्रहोमं कुर्यात् तत्राविच्छिन्नतस्य वत्सो
पसर्जनकाले च विनष्टस्य पयसा होमासम्भवादिति देशपक्षे एव युज्यते।
दुह्यमानमाविच्छिन्नमित्यादिसूत्रपम भवति कारिकाकाराभिप्रायः अथ
वागविच्छिन्नं दुष्टं होमविधानसामर्थ्यात् न हुत्वा हूयते। होमपक्षाश्रय

देवष्णअ२५ णोत्तं दुग्धाद्युस्ययवागूदध्यादिबहुहोमद्रव्यो बुविनष्टेष्वप्येतान्येव प्रायश्चि
११ त्तानियथासंभवं भवंति॥ तत्र प्रयोगो निर्दिश्यते अमुकएतत्ते तं दुग्धः एत
त्ते आराद्वं एपाँ यवागूः एतत्तेदधीत्यादि स्कन्दे दुग्धे स्कन्ने नूधितप्राज
नीत्यभिमृश्य शेषेण जुहुयात्॥ तदग्निहोत्रार्थं पयश्चेद्यदि स्कंदेत् स्था
ली तोबर्हिर्गच्छेत्। भमो अन्यत्रवापतेत्तदा अस्कन्नमधितप्राजनास्यने
नमंत्रेण स्कन्नमभिमृश्य शेषेण स्थालीस्थेन जुहुयात्॥ अग्निहोत्रहो
मं कुर्यात्तत्रात्र्यभिमर्शनानन्तरं स्कन्नस्योपर्युदकासेकः कार्यः स्कन्न
प्रायश्चित्तेनाभिमृश्याद्भिरुपनिनीय परिशिष्टेन जुहुयादिति श्रुतेः
दोह्यमानस्य स्कंदने भिमर्शनानन्तरमुपर्यपां सेको न्यस्मिन्काले त्व
भिमर्शनेमात्रमेव तत्रैव श्रुतत्वादिति याज्ञिकाः यवाग्वादि सर्वाग्नि
होत्रद्रव्य स्कंदने प्येवविधिस्तेयं भिद्येत चेद्वापद्येत स्कन्नप्रायश्चित्तेनाभि
मृश्य वर्वाहृतिभिश्चाद्भिरुपनिनीय कपालानि भस्मोद्वापे कुर्यात्॥ नु यदि
स्थाली भिद्येत विदीर्येत भेदं प्राप्नुयात् यदा अवापद्येत अधोमुखी
भवेत् तदा स्कन्नं द्रव्यं स्कन्नप्रायश्चित्तेनाभिमृश्य अस्कन्नमीमा तज ११

न नीत्यनेन स्वं न प्रायश्चित्तेनाभिमृश्य व्याहृतिभिश्च भूर्भुवः स्वरित्येताभि
रद्भिः रूपनिनीय तदुपर्युप आसिच्य यदि भिन्ना स्थाली तदा तस्याः कपा
लानि षंडानि । भोस्मो ह्यापि भस्मराशौ कुर्यान्निर्वपेत् । भस्मोह्याप शब्दे
न प्रस्य हें गार्हपत्यादिस्वरेभ्यो भस्मोहृत्य यो राशिः । तिः क्रियते स उच्यते
। यघूनी चीस्थाली स्याद्यदि वाभिघ्नेत्तिपकम्य सर्वमेतत्कूयते अधोमु
खो भावेन तद्कासेकान्तमेव स्थाली भेदे तु वक्ष्यमाणं भूमिर्भूमिमवाग
दितिभिन्नाया अभिमर्शनं भवत्येव अन्यत्र नस्येणाग्निहोत्रहोमः । य
दन्यद्धि दे तेन जुहुयादिति श्रुतेः । आश्वलायनब्राह्मणे त्व यद्यदि स्क
न्निघेतेका तत्र प्रायश्चित्तिरित्यन्यां स्कं चमाहृत्य जुहुयादथैनां स्कव
भिन्नामाहवनीये भ्यादध्यात्स्मा गदं डांप्रस्य कुषुक्रां सा तत्र प्रायश्चित्ति
रिति तथा च कात्यायनः । विनष्टं स्कन्नं तु वं तु सुब्जं प्रत्यक्षकछातमुद्दर्विषि ।
प्रत्यगग्रं वमुसहत्तं प्रहरेत्तात वेदसीति मुवपत इति हविर्यज्ञियं । हवि
र्यज्ञशब्दे न दर्शपौर्णमासौ तद्विकाराश्च तत्संबंधि हविर्यज्ञियं चरुपुरोडा
शाऽपसान्नाय्यमांसादि द्रव्यं तत्स्कन्नं भस्मादिपतितं मुवयत इत्या
दिमंत्रत्रयेणाभिमृशेत् । भस्मशेत्रा सस्कं नमभिमृशति मुवपत ये इत्यादि

अ
देवप्र २५
१२

श्रवणात्। सोमेह विर्यद्धि येत्येवं मन्त्रेइदमेवप्रायश्चित्तं तत्र भूवपतयइ
त्यभिमन्त्रणात्पूर्वकालाहुतिवाचने अधिकेइति विशेषः। यदि बर्हिः
परिध्याहुतिः स्कंदेदग्नौ धं ब्रूयादेतां संस्कृत्य जुहुधीति यथावदाने स
पायव बद्धतेन मध्येपाणिनाजुहोतित स्मैपूर्णो दशेद्यामन्द्रूपत येस्वाहे
ति बर्हिः परिधिस्कं न्नमभिमन्त्रयतइति मानवेदर्शनादेतः परिधिस्कं
दनेन प्रायश्चित्तं देवांदिवमगंन्तिति सोम। सोमेरसरूपेसोमइध्येस्कं
न्ने देवांद्दिवमगन्तिस्यनेन मंत्रेण स्कं न्नस्य सोमस्याभिमर्शने कर्तव्यं
। अत्रापि पूर्वकालाहुतिवाचने भवतः। कालाहुति भिश्चैतत्समुच्चीय
ते भिन्नांशवर्तित्वात्। इदं च मध्वर्युः कुर्यात्समाख्यानात्। कालाहुतिमा
त्रे ब्रह्मणः श्रवणात्रे ति हरिस्वामिनः। पयो रेज्जसेति वोदके नोपसिंचे
त्। अथवा स्कंन्नं सोमं पयो रेजसा स्कभितेति मन्त्रेणोदके नोपषिंचेत् अ
त्रापि पूर्वकालाहुति होमो वाचनं च। अत्र विप्रतिपत्तिः सोमेहा विर्यद्धि
यं स्कंन्नदेवां दिवमित्यनिमर्शेत्। पयोरेजसा स्कभितेतिमंत्रेणोदकेनोप
सिंचेद्वा इति कर्कः। सोम सोमदिक्मितिवासुदेवः। रसरूपं सोममिति हरि
स्वामिनः। अथयदि स्कं देदित्यत्राथयपारूपं द्रेदित्यनेन प्रायश्चित्तं ज्ञा पुनु वर्त्ते १२

तोयदि यज्ञस्यसंबंधि सोमोभिषुतस्कंदेदित्यर्थः।कुतः नतावदाऽस्यादिप
त्तेनैतत्प्रायश्चित्तं।पातितोपितस्मिन्द्रोणकलशे तस्ययज्ञस्यवैगुण्याभावा
त्।तत्रापिप्राप्तत्तस्यैवप्रायश्चित्तस्याभावात्।अनभिषुतेचसोमेस्कंन्ने
पुनर्गृहीतुंशक्यत्वात्।गृहीतेचतस्मिन्वैगुण्याभावात्।अभिषुतस्तुयः
स्कंदतिपात्रादावपिस्थितश्चावश्यंकियांश्चिदंशस्याहरणीयोभवति।तेन
न्यूनःसोमोभवतीतिवैगुण्यात्तत्रैवयुक्तंप्रायश्चित्तमिदंति नयदिसोम
स्यरसःस्कंदेदित्यर्थःइतिहरिस्वामिनः।अयमेवार्थोयुक्ततरइवाभाति
तेनरसरूपसोमस्कंदनएवैतत्प्रायश्चित्तं।सोमेपिहविर्वद्विषयेश्वाद्युपु
रोडाशादिकेस्कंन्नेभुवपतनयज्ञस्याभिमर्शनमेवा।उन्नीतसर्वस्कंदनेस्कन्ने
त्तिदयोरत्त्रैवासनं।स्कन्नेतुचमसुन्नीतस्यस्कंदनेस्कन्नेदेवतत्त्रैवासनं।यत्र
प्रदेशेस्कंन्नात्सर्वस्कंदनंवाततंत्त्रैवोपवेशनंतु।यांतत्।ततःस्कंन्नस्या
स्कन्नत्तिमंत्रेणाभिमर्शनमुदकोपसेवनंचापमुनीचीःस्तकस्यादिति
प्रतत्स्येवमेवश्रुतत्वात्।ततः किंकर्तव्यमित्यतआह अन्वदुन्नीयांन्यो
सोमप्रयच्छेत्तेनहोमः।अन्योहोमकर्तुरन्यःकश्चित्सर्वस्कंदनेतस्यामेव
रात्रौचित्तेग्नेदेवान्यस्यांप्रतपनादिसंस्कृतायांस्थाल्याःसकाशादुन्नी

यदुत्पवनं कृत्वा अस्मै होमकर्त्रे सर्वस्कंदनभेदनच्छादनेऽपविष्टाय प्रय
च्छेत्। समर्प्पयेत्। तेनान्यसमर्पितेन होमः कार्यः। तस्माद्यच्छाऽऽयांपरि
शिष्टं स्यात्तदस्मादुन्नीयाहरेयुरिति श्रुतेः। अन्येनान्यस्मिन्नुन्नीयमाने
उन्नेष्यामीति प्रैषो न भवति। तद्दोहेन्नेष्यामीत्युक्तं भवतीति श्रुतेः
यदि स्थाल्यामपि न स्यात्तदा यदन्यत्राप्नुयात्तत्पूर्वेणाहवनीयमाहृत्या
धिश्रयणादिभिः संस्कृत्या प्रैषमुन्नीयाऽन्यस्मै समर्प्पयेत् तेन जुहुयात्
। यद्युतत्र न स्यादन्याहृद्दे तदग्नावधिश्रित्याऽप्रैषवर्ज्जमास्यायः प्रत्यानीयो
द्वास्य तद्दोहे वोन्नेष्यामीत्युक्तं भवत्यथात्र प्रयोन्नीतमेवास्मादुन्नीयाहरे
युस्तेन कामं जुहुयादिति श्रुतेः। यदि स्थाल्यामल्पं स्यात्तदाऽन्येनाधिप्याय्याक
यचिदुन्नयनं कार्यं परिशिष्टेन जुहुयादिति वचनादिति याज्ञिकः। तथा
चापस्तंबः यदि दुह्यमानं दुग्धं दुह्यमानं वाधिश्रीयमाणमधिश्रितमुद्वा
स्यमानमुद्वासितमुन्नीयमानमुन्नीतं वा स्कंदेत् देवयाहङ्खीहकृष्टहो
तव्यमन्यथावाभिहोऽघ्निमिति। तदेवयावज्जावह्या अनाहुतिमात्रमपि हो
तव्यं। अन्यावागोस्तस्यो परिदोहनीयेति धूर्तस्वामिनः। परिशिष्टेन
कार्यसमर्थेनेति शांखायनभाष्यात्। अन्नीतसर्वस्कंदनगतत्। असर्व २२

स्कंदने चुल्कं दग्धस्य स्कन्नप्रायश्चित्तेनाभिमर्शनं तूष्णीमुदकोपसेचनं च
न च कृत्वा परिशिष्टेनान्येनाग्निहोमः कार्यः। तदाहुर्यस्याग्निहोत्र ६ः स्कन्नमु
न्नीत ६ः स्कंदेदित्युपक्रम्य स्कन्नप्रायश्चित्तेनाभिमृश्याद्भिरुपनिनी
य परिशिष्टेन जुहुयादिति श्रुतेः। स्थालीस्थस्य सर्वस्य नाशे गवां तद्दोहे
ग्निहोत्री धुक्ष्वेति प्रैषो भवत्येव तु न्तेष्यामानिवृत्तौ प्रैषवचनाभावात्। पू
र्वाहुत्यामेव सर्वस्योन्नीतस्य होमे कृते आध्वर्यवं हुत्वा चतुर्गृहीतेन सच
तुर्गृहीतेन वोत्तराहुतिः। उत्तराहुत्यां सर्वहोमे दोषे वा आध्वर्यवमेवा न क्षादेः
शेषकार्यस्य लोपः २ पूर्वाहुतौ हुतायां चेदाहवनीयोनुगच्छेत्तदुक्तं चेद्यदि
पूर्वाहुतौ हुतायां सत्यामाहवनीयोनुगच्छेदुपशाम्येत्तदुक्तं तत्प्रायश्चित्ते
श्रुतावुक्तं। तदाहुर्यस्याहवनीय उद्धृतः पुराग्निहोत्रादनुगच्छेदित्यु
पक्रम्य गार्हपत्यात्वेवैनं मां च मुद्धृत्योपसमाधायाग्निहोत्रं जुहुयादित्य
स्यां श्रुतौ गार्हपत्यादुद्धृत्याग्निहोत्रं जुहुयादित्युक्तं। तेन माय प्रायोद्धरण
न्यायनायतदुक्तं ग्रहणं। तेन अनादिष्टहोमार्थमाहवनीयमुद्धृत्याना
दिष्टं हुत्वा पुनरुद्धृत्योत्तराहुतिः कार्या। प्रातमप्युद्धरणमुत्तरेणाकाष्ठ
हिरण्यादिविधानेन सह विकल्पार्थमुक्तं। उत्तराहुतिहोमात्प्राक् पु

ग्निहोत्रादिति वक्तुं शक्यते तस्याप्यग्निहोत्रशाहूयमानत्वात् । काष्ठं
हिरण्यं वाभिजुहुयात् अश्मनः । अथ सावापूर्वाह्नेऽहुतायामाहवनीय
स्थाने निधायाभिजुहुयात् । तद्वत्पर्युक्षणमाहुतिं जुहुयात् । कुत एतत् । अश्म
नः तदाहुर्यस्य पूर्वस्यामाहुत्यां हुतायामथाग्निरनुगच्छेदित्युपक्रम्य
प्रतिवेशं कुलं विंदेत मध्यस्याभिजुहुयादिति । अथ यत्र प्रतिवेशं
सन्निकृष्टं । तथापयुश्चमध्ययां वल्लिरेव हिरण्यमभिजुहुयादित्याश्व
लायनः । तेनाग्निरुद्धानेकाष्ठं निधाय होमे क्रियमाणे यदि यजमानस्य
हृदयविलेखो भवति अविद्यासोऽपरितोषो भवति तदा हिरण्यं निधा
य तस्मिन् जुहुयादिति अश्मरथ्यः । तथा चाश्वलायनः । अग्नावनुगते तं
सहुतौ हिरण्यं उत्तरां जुहुयादिति अत्राध्वर्यवं न भवतीति नेमिति
कांतरस्यादिष्टत्वात् । उत्तराहुतेरुद्धृते मध्यनुगमनं प्येवमेव त्रिरुद्धृ
तश्चेदाहवनीयोऽनुगच्छेदुद्धृत्य स्थानान्युपलिप्य निर्मथ्य सकृदुद्धृते त
स्मिन्सायंप्रातर्होममेवेके । उद्धरणानंतरं प्रागग्निहोत्रहोमारंभात् आह
वनीयानुगमने तमुद्धृत्याध्वर्यवं कृत्वा पुनरुद्धृत्याग्निहोत्रं जुहुया २४
त् । एवमेव वारत्रयमाध्वर्यवपूर्वकमुद्धरेत् । अथ यचेद्यदि त्रिरुद्धृत

14

स्मिवर्त्तरमणुद्धृत आहवनीयोऽनुगच्छेदुपशाम्येत्। तत्रोदकस्पृ
र्वे भ्योग्निरक्षानेभ्युद्धृतास्मिन्प्रदेशि रक्षा नानि अग्नीनां माहर्पत्यस्याहवनी
यदक्षिणाग्न्योनां रक्षणानामनुपलिप्यके गोमयेनोपलक्ष्येतान्यं चमसं रक्षारा
न कृत्वा निर्मथ्य गार्हपत्यं स्थं अत एव मंथनोपदेशात्पूर्वं गार्हपत्यं समारोप्य
ततोग्निरक्षणोपलेपनं ततो मंथनं यां स्थाने स्थापनं ततः आहवनीय
स्योस्योद्धरणं पूर्ववहनस्ये च दक्षिणाग्ने रुद्धरणं सकृदुपने सायं होमार्थ
मुद्धृत एव तस्मिन्विहारे सायंप्रातर्होममेके कुर्वन्ति। एके प्रातर्होमार्थं पु
नरुद्धरंति प्रातश्चेन्निर्मिश्चन्तः प्रातर्होममात्रं तस्मिन्विहारे भवति। अ
थवा एके शान्ते नेदं प्रायश्चित्तं। विकल्पेन विधीयते। निरुद्धतानुगमने
एके उदकच्छोमानुपलिप्येत्यादिकं प्रायश्चित्तं कुर्वन्ति। एके शान्तं कृत्वा समु
द्धरंति   गार्हपत्येऽनुगते भस्मनारण्योः संस्थापनं मंथनं। गार्हपत्येऽनुग
तेऽनुपशांते अरण्योः अस्मनासंस्थापयस्मिन्न्वष्टौ गोमयपिंडे वा उपशा
न्तं द्वितीयेन भस्मना अरण्योः संस्थाप्य मंथनं कार्यं। अग्निहोत्रे विहार
काले गार्हपत्यानुगमनं एतन्मद्भवतीति कर्कसंप्रदायकारो। अन्ये तु सर्वे
देवतद्भवतीत्याहुः। तणना चर्कोगाक्षिः। गार्हपत्यमुपशांतमवदाहेमं

थे पुनरविद्यमानेऽभस्मनारणीसमुत्पन्नमथे पुरिति सामान्येनोक्त्वा
त्वा तदाहवनीयस्य गार्हपत्यो भुगच्छेदिति मन्त्रस्यार्थः । हे च उल्मुकादेवनिर्म
थनीत्यभिधाय तदुत्कुर्यादिति तन्निषिद्धोच्चमेव कुर्याद् उल्मुकाद्गार
मादाय नमरण्योरदाविमथ्यादिति श्रुतिः । सर्वस्य गार्हपत्यादाहव
नीयस्थानेनोत्सोद्धरणे कृते पंचभूसंस्कारपूर्वकं तत्स्थाने कृत्वाधा
पश्चिमार्धे दक्षिणाग्निपूर्वकमाहवनीयमुद्धृत्याध्वर्यवे हुत्वोद्धर
णं कुर्वीत । दक्षिणाग्निस्थाने सर्वोद्धरणेप्येवं । दक्षिणस्येवां सर्वस्याह
वनीयस्योल्मूकोद्धहने कृते तत्स्थाने स्थापयित्वाध्वर्यवे हुत्वापु
नरुद्धहनं कार्यं । सर्वस्याहवनीयस्यापक्षुण्णापणोद्यर्थेनयनेप्येवं । सर्वस्या
ग्नीध्रीयस्योपयत्नोमार्थे होतृधिष्ण्ये स्थापनेप्येवं । एवं सर्वत्रैकदेश
नयने विहिते सर्वनयनेऽतते ज्ञेयं । उल्मुकयोर्विद्यमानयोरयाजार्थत्वा
दाहवनीयस्य गार्हपत्यादेवोद्धरणं नोल्मुकाभ्यां । उल्मुकानुगमने चा
नादिष्टहोमे पूर्ववदनुद्धहनेन गृहीतानुगमनप्रायश्चित्तं । प्रागंत्यानुया
जादुल्मुकोद्धहनं कृत्वा समासं तुर्यात ऊर्ध्वं त्वाध्वर्यवमेव समासवि
स्मरणे च आहवनीयजागरणे वा तन्त्रमेवोद्धरणं । दूरइतः प्रभृति अ

ग्निहोत्रहोमादि यथाप्राप्तमेव नमितिकाऽन्यनिधीयते आहवनीयजाग
रणे अनुपशान्ते विद्यमाने आहवनीये गार्हपत्येऽनुगते तदा आहव
नीयात्प्रागुद्धरणं कर्तव्यं। तदाहुर्यस्याहवनीयेऽननुगते गार्हपत्योऽनु
गच्छेदिलुपद्यमानः। हैके तत एव प्राञ्चमुद्धरन्तीति श्रुतेः। यः प्रागुद्धृ
तः स आहवनीयः। यस्मादाहवनीयस्थाने अवशिष्टः स गार्हपत्यः। पूर्वो
द्धृत एव दक्षिणाग्निराहस्यविनीयस्थानापन्नः। एवं कृत्वाग्निहोत्रं हो
तव्यं। होमान्ते गार्हपत्यस्य मन्थनं कार्यं तदाह कारिकाकारः। समन्थने
ऽनुपक्षे तु गार्हपत्यः स वह्निरन्तरे तु वपक्षे तु होमान्ते मन्थनं भवेदिति
। तथा च मनुः। यस्याहुतेऽग्निहोत्रे परोऽग्निरनुगच्छेदनुगमय्यापूर्वमप
रस्मान्नाग्निं त्वापद्यते यद्यदित्वरेतानन्तनएव प्राञ्चमुद्धृत्य दक्षिणाग्नि
मन्वा- नीयसायं प्रातर्जुहुयादिति। दक्षान्तरमाह   आहत्यवा वाऽद्य
हौविकास्यार्थः। अथवा आहवनीयं सकलमपि गार्हपत्यस्थाने
आहृत्य ततस्तदेव गार्हपत्यस्थाने माहृतादेव पुनरुद्धरणं कर्तव्यं। अ
थ हैके पत्यस्य च माप्ररन्तीति श्रुतेः। अतएव प्रवोद्धरणमित्यनुवर्तते।
अत्रापि होमान्ते गार्हपत्यस्य मन्थनं कार्यं तदुक्तं पराऽस्याग्नाहोत्।त

आ२५
देवभाष्य
२६

16

नरावोद्धरणमित्यनुवर्त्तते। उत्पन्नानि तृणानि। ते चांगाराज्ञिः श्रोतिः
उत्पराज्ञिः तृणैर्वर्ज्जिः तथा उत्पादपरा उपात्तृणैर्वात्यो द्धृत्वं स्या गार्हप
त्यस्थानमागताद्ग्नेः पुनरुद्धरणं कर्त्तव्यं। अथ यथापूर्वस्य पूर्वमेव
परित्यागतः पुनरुद्धरणविधानात्। होमांते गार्हपत्यस्य मंथनं निर्म
थ्यवा। ततउद्धरणमित्यनुवर्त्तते। अथवा गार्हपत्यं निर्मथ्य ततउद्ध
रणं कर्त्तव्यं। अथ यहैके त्वं गार्हपत्यं मंथंतीति श्रुतेः। न चास्मिन्पक्षे हो
मांते मंथनं कृतत्वात्। निर्मथनपक्षे प्रकारद्वयमाह समारोप्यास
मारोप्य वा पूर्वमुपसमयत्यं एवं वहोमः। निर्मथनेप्रकारद्वयं समारोप्या
समारोप्य वा। तत्र समारोपपक्षे पूर्वमाहवनीयमुपशमय्याप्रशांतं कृत्वा
गार्हपत्यं निर्मथ्य स्वस्थाने एव संस्थाप्य स्वस्थानत एवाहवनीयमुद्धृ
त्य तत्रैवाग्निहोत्रहोमः। पूर्ववद्धृताश्च दक्षिणाग्निरस्मिन्पक्षे। अथ
हैके नुमथ्यान्यमयंतीति श्रुतेः समारोपेति पक्षे तु आहवनीयं स
मारोप्य एवं वहोमः। पूर्ववद्दिसुदकछाना सुपरित्यज्य गार्हपत्यं नि
र्मथ्य सहहृदुद्धृते सन्निलिहारे सायंप्रातर्होमं इत्यर्थः। दक्षिणाग्निः
पूर्वोद्धृत एव तन्नीयते। प्रातरग्निमित्रान्तरा प्रातर्होमात् वकेवलं तं २६

स्त्वा अस्मिन्न्यक्षेत्रायमेतेन हुत्वा प्रातःकाले ग्निहोत्रं हुत्वा पूर्वेभ्यो
ग्निरक्षा· नेन्यो भस्माहूरणं गोमयेन तेषां रक्षा नानामुपलेपनं पंवभ
संस्कारकरणं। अरणे हरग्नी समारोप्य तस्मान्नुखा॰ नान्त्वस्या नेप्र
स्या गमनं गार्हपत्यस्य मंथनं। आहवनीयस्याहूरणं। दक्षिणाग्ने
राहरणं। ततो ग्न्ययनपि हुते ष्टाकपालः पुरोडाशो ग्न्यन्वाधानादिभ्रा
सणान्तर्पणं ततः कार्यं॰ आहवनीये निधायमाने गार्हपत्यो प ज्ञामे समारोप्य
मंथन प्रसेपत्वा वस्मा द क्षिणा नुते: इष्टमेवकुर्यादरेण्यो रग्ना स
मारोहणोपदेशु व सायनिर्मथ्य जुहू ह सेदि सुपत्न्या यथा ए तेनेस्मान्युद्ध
रण गोमये नोपलिप्याऽरण्यो रेवाग्नी समारोप्य मत्स्यवत्स्यति मध्ये सांग
त्वा गार्हपत्यमुद्धृत्याहवनीयमादध्यान्वाहार्यपचनमग्नये पथिकृते
ष्टाकपालं पुरोडाशं निर्वपेदिति भ्रान्तत्वात्। अथवाग्नं थनप्रक्षेपक्षत्रे
यं। तत्र सत्रयो जना निर्मथ्यथा। अथवा गार्हपत्यं निर्मथ्यावस्थाने स्था
पयित्वाग्निहोत्रं जुहुयात्। आहवनीयदक्षिणाग्नी पूर्ववैव। अथ
हैके न्यं गार्हपत्ये समं थंतीति श्रुतेः। अस्मिन्न्यक्षेन्नायमाग्न्ये वैनदित्याध्वृ
र्यव होमो भवती निकर्षः। नेतिया श्चिन्हिकः। समारोप्य समारोप्य यायू

अ २५
देवभाष्य
१७

र्वैमुपशामय्यपूर्ववद्धोमः। आहवनीयंसमारोप्यपूर्ववद्धुत्वा नान्युपा
लि ष्वग्निर्मथ्यमन्त्राद्धुते विहारे सायंप्रातर्होमिः। प्रातर्भस्मोद्धरणादीन्यत
। असमारोप्य पूर्वस्याहवनीयस्योपशमनं कृत्वा निर्मथ्योद्धृत्य तन्त्रं च होमः
सर्वपक्षेषु सरावदक्षिणाग्निरितिसंप्रदायः। केचिदुभयोः पक्षयोः पूर्वव
द्धोममिच्छन्ति यावत्सन्तेउ अग्नीसमारोप्येत्यत्र हरिणो। भिन्नः। गार्हपत्यस्या
वदरणेयोरारोहणात्। अरणीवावसगच्छतीतिवचनात्। आहवनीयस
मारोपितेउनौ समारोपितो भवति ततश्चारण्योरेवगार्हपत्यं समारोप्य
त्यर्थः। अयवोवा भवाव पितृ वेदानावर्त्त इति तत्समारोपणेनौ
समारोपयेत निराहृतो दक्षिणाग्निरनुगच्छेदनाहार्यमस्य तदाहरे
त्। यदि गार्हपत्याद्धृतो दक्षिणाग्निः स्यात्। होमाहर्त्येन तदाध्वर्युश्च होमा
र्थं दक्षिणाग्निमाहृत्य आध्वर्यवं हुत्वा गार्हपत्यात्पुनरग्निहोत्रार्थं
माहरेत्। यपाहृतः पुनरप्यनुगच्छेत्तर्हि त्वारानेव माहरेत्। अथ चेद्यदि
निराहृतो दक्षिणाग्निरनुगच्छेत्तदा नदन्तन्त्व हुत्वा तस्मिन्नाहुतिरेवेऽअ
नारणकं कुर्वन्ति। तस्मिन्दिने लाहरन्ति। तदा दक्षिणाग्निहोमलोपः
नस्यात्। एके शान्तकृत्वा प्याहरन्ति दक्षिणो सह यो दक्षिणाग्नि श्रेष

17

दुपशांतस्तदा येन प्रकारेणानिर्मथनं वैरूपकुलादाहरणादिना आ
धाने आहृतस्तेनैवान्वादिसंपाद्यः। नित्यधारित्वपक्षे यदग्नीनामुप
शमस्तदाध्वर्युगमेकैकस्य स्वस्वयोनेराहरणं। आहवनीयं जारगार
णेवेत्यादिप्रायश्चित्तमपि नित्यधारित्वपक्षे न भवति। धारणे च परा
र्थत्वादिति जैमिनिनानिसस्तत्वात्। कृताग्न्यन्वाधाने प्यग्निषु अग्नि
होत्रविहारकाले उपशान्तेष्वपि नैते पक्षाः किंतु तत्र गार्हीनानुगमनप्रा
यश्चित्तमेव भवति। विहारकालादन्यत्र यदानयोऽनुगच्छति। मथित्वान
यमुद्धृत्यानादिष्टं तत्र हूयत इति। प्रायश्चित्तमेव भवति जागतमाह
वनीयमस्युद्धरेच्चेत् तदुक्तं। चेद्यदि जागतमनुपशान्तमाहवनीयं तं
शांतं ज्ञात्वा अमुहूर्ते न गार्हपत्यादन्यमुद्धरेत् तदा तदुक्तं तत्प्रायश्चि
त्तमुक्तं किंतु आध्वर्यवमेवात्र अन्यस्यानुक्तत्वात्। एवं च सत्याध्वर्यवं
कृत्वा भ्रात्योद्धृतस्य गार्हपत्यमध्ये पूर्वात्पक्षे पः। अतः कारणादाह
वनीयस्य स्वस्थाने विद्यमानत्वेन गार्हपत्यमध्ये तदभावाद्योगार्हप
त्यादेकदेशादाहवनीयप्रदेशं नीतः स गार्हपत्य एव नाहवनीय इति

तस्य पश्चात्प्रक्षेप एव पूज्यते। अथ यथाकरणानिमित्तमाध्वर्यवं भवति
। अथ यस्य कल्पदोषो दुष्टोयमग्निरिति बुद्धिश्चेत्तदा वक्ष्यमाणो नैमि
त्तिकं कुर्यात्। पश्चान्निधाय पुरस्ताद्धोमपक्षहोममेके। तं भ्रांत्योद्धृतं
रक्षोपनात् प्राक् स्थानं पश्चान्निधाय पूर्वोद्धृतस्याहवनीयस्य पश्चादप
रस्मिन्प्रदेशे निधाय रक्षोपयित्वा। अथवा पूर्वोद्धृताहवनीयस्य पुरस्ता
त्पूर्वप्रदेशे निधाय रक्षोपयित्वा उभयत्राग्निद्वये होमं कुर्वंत्येके। एके त्वा
हवनीयस्य मध्ये पश्चात्प्रक्षेपं कुर्वंति उभयत्रहोमपक्षे एकं चतुर्गृहीतमे
कस्मिन्नग्नौ हुत्वा पुनश्चतुर्गृहीतेन द्वितीयेग्नौ हुत्वोपमार्जनादि भ
क्षांतं तंत्रेणोभयत्र कुर्वंत्येके तद्युक्तं। प्रधानं हि होमः। अग्निश्च तत्साध
नभूतो गानं चांगानुरोधेन प्रधानावृत्तिर्युक्ता। तस्मादिदं कुर्यात्।
स्थानवती प्रणालिकासहस्रीसमिधमग्निद्वयस्योपर्याधायैकमेव च
तुर्गृहीतं गृहीत्वा तस्यां समिधि तत्स्था होतव्यं यथा हुतं हव्यमुभयोरग्न्योः
प्राप्नोति एवमुभयत्र होमः कृतो भवति। अथास्यैव भ्रांत्योद्धृतस्याग्नेः पू
र्वोद्धृताहवनीयस्योपरिरक्षोपनेतान् प्रायश्चित्तमाह अग्निनिधाने १८

१३

ग्नयेऽग्निमते पुरोडाशः। उपशांतमग्निं त्वा गार्हपत्यादुद्धृतस्याग्नेरनुप
शांतं पूर्वस्याहवनीयस्योपरि निधानमग्निनिधानं। तस्मिन्नभिधाने
अग्नावुपयग्निनिधाने कृते आग्नयेऽग्निमते अष्टाकपालः पुरोडाशः का ॥
र्योऽन्वाहार्यदक्षिणः। तस्मिंस्त्वेव विहारे नष्टं गत्वा। इष्टेरनंतरमग्नि
होत्रहोमः। अथ वित्तकालाद्यभावे नेष्टिं कर्तुमशक्तस्य हृद्विलेखरहि
तस्यैवाभिधाने प्रायश्चित्तांतरमाह समितमिति वोपस्थानं द्वाभ्यां अ
थवा। अभिनिधानेन निमित्ते समितंऽ संकल्पेथां सं वां मनाऽसीत्याभ्या
मृग्भ्यां तयोरुभयोरग्न्योरुपस्थानं कुर्यात्। हृद्विलेखप्राप्तकामिहिं
कुर्यात्। हृद्विलेखाभावे वित्तकालकर्त्राद्यभावे वोपस्थानमिति व्य
वस्थितो विकल्पः। दक्षिणाग्नेरभ्युद्धरणेऽपीदमेव प्रायश्चित्तद्वयं वै
कल्पिकं भवति कुतः अग्नावभ्युद्धरेयुरिति सामान्येन श्रुतेः। गृहीतानु
गमने चान्वग्निरित्याहृत्य शाखान्तरे श्रूयते ममास इत्यग्निं गृह्णाति
ति तेन गृहीतः। तत्राग्न्याधानं तस्याहवनीयादेरनुगमनं गृहीता
नुगमनं तत्र गृहीतानुगमने त्वग्निरित्यनेन मंत्रेणोपशान्तमग्निमा
हृत्य स्थापयित्वा चकारादेव पूर्वोक्तं प्रायश्चित्तद्वयं विकल्पेन भवे

19

ति। तत्र हृद्दिलेखेऽस्मिन्नग्नये ग्निमनद्धूम्रिते हृद्दिलेखाभावे कालविलंबकर्म्मा
द्यभावे यसमितावि ति द्वाभ्यामभ्यामुपस्थानमिति अवस्थितो विकल्पः
। गार्हपत्यानुगमेपि तस्य ज्ञातस्यारणेः सकाशादन्वग्निरित्याहरणं
भवति। आहवनीयस्य प्रक्रमात्तदनुगमे न्वग्निरित्याहृत्य समितमि
ति द्वाभ्यामुपस्थानं गार्हपत्यदक्षिणाग्न्योरनुगमे वा नादिष्टमिति वा
सुदेवः। युक्तं चैतत्स्मात्तथा चापस्तंबः। यद्यन्वाहितानेराहवनीयोनुग
च्छेदन्वग्निरुषसामित्यन्यं प्रणीयेत्यादि गृहीतानुगमते चेति चका
रणे पूर्वसमुच्चितमुपस्थानमेवात्त्रष्यते। नत्वेव हि तोग्नयोग्निमतेपु
रोडाशाद्दतिश्रीयाज्ञिकाः। युक्तरूपमिव चैतदाभाति तत्र ग्न्यन्वाधा
नेन तेगार्हपत्यो पशमे मथनमेव भवति। न पूर्वोक्त आहवनीयात्
प्रागुद्धरणापेक्षाः प्रासंगिके प्रायश्चित्तं न विद्यते परार्थत्वादिति न्या
यात्। तथा गार्हपत्यस्य मंथनेनिर्यमाणे यदि होमस्य कालातिक्रमो
भवति। तदा तन्निमित्तमहृतान्युदितउन्नीयात इति तोरणी। तेत्यादि
प्रायश्चित्तं कृत्वा होमं कुर्यात्। ननु गार्हपत्यस्य प्रकारान्तरेणासंपादन
मिति केचित्। अपरे तु मथ्यमानश्चेन्न जायेत यमहं रात्स्यराप स्येतमा

हृत्याभिजुहुयादित्यादिना गार्हपत्यं संपाद्याहवनीयदक्षिणाग्न्य
नुगमे चत्वावपि जनन एवं विहृत्याग्निहोत्रं हुत्वा होमान्ते मंथनं कृत्वा
गृहीतानुगमनप्रायश्चित्तं तत्त्वा प्राचीनं कुर्वीत। युक्तं चैतत्। होम
कालातिक्रमभयाद्देवतेषां पक्षाणामुक्तत्वात्। कृ. तत्ताग्न्यन्वाधान
स्याहवनीयस्योपशांतस्यास्तमयादूद्वयाद्वा प्रागनुद्धरणेप्यनुद्धृता
भ्यस्तमय इति अभ्युदये रजनधारणपुरस्तादित्येतत्प्रायश्चित्तं न भव
ति। अग्निहोत्र आसनेषु वत्याश्चाहवनीयोनुगच्छेदित्येतदपि
इष्ट्यर्थमुद्धृतेष्वस्मिन्काले उपशांतेषु न भवति। अग्निहोत्र इत्युक्तत्वा
त्। अग्निहोत्रांगभूताख्यं न येपथिकृतेग्नये ग्निमते आग्नये च सूर्यदेव
ते सूर्याय च ज्योतिष्मते इत्यादिकाहिष्टिर्युक्तियमाणास्वन्यन्वाधानो
त्तरं काले अग्नीनामनुगमने च गृहीतानुगमनप्रायश्चित्तं न भवति। किं
त्वनादिष्टमात्रत्वोपशांतस्य स्वयोने राहरणं भवति। तदुक्तं कारिका
यां। अग्निहोत्रांगभूतेष्टिमध्ये त्वनुगमो यदि गृहीतानुगमो न स्यादाहा
धानेष्टिवदत्र तु सा धारण्यं न चेहाग्निर्यन स्यात्योर्सा मासवत्। न ह्यु
द्धरणमिष्ट्यर्थं किंतु होमार्थमेव तत्। तस्माद्यथा तिथेर्होमकालीन

20

नस्य भुजिक्रिया ॥ नाग्निहोत्रांगमेवं न गृहीतानुगमस्यिह। किंत्वना
दिष्टमात्रेण पुनरुद्धरणं भवेदिति। अत्राग्निमन्तीयपक्षाश्रयणो वक्ष्य
माणे पंचशरावबत्कर्म कर्तव्यं   अनादेशे पुरोडाशाः सर्वत्राग्न
ये च सूर्याय च नेतव्या यवस्योतिष्मते आग्नेये अन्नपतय इत्या होहविर्द्रव्य
स्यानादेशे सर्वपुरोडाशो हविर्भवति। यत्र श्रुतिवाक्ये द्रव्यस्यानभिधा
नं तद्विषयमिदं सूत्रं। अग्न्याधानये ग्निमते पुरोडाश इत्येवा त्वं स्यात्
। अनस्तमिते सूर्ये आहवनीयस्योद्धरणमुक्तं गार्हपत्यादाहवनीय
स्योद्धरणे मनस्तमितानुदितयोरिति सयः पुराहि स्यस्त्रीं स्यात् तमया
दाहवनीयमुद्धरतीति। तदपराधे प्रायश्चित्तमाह   अनुद्धृताभ्यस्तम
ये नु श बद्धे हिरण्ये पश्चात् ध्रियमाण इध्मेनोद्धरेदार्षेयो ब्राह्मणः। अ
नुद्धृते आहवनीये सूर्यास्तमयो नुधृताभ्यस्तमयः तस्मिन्ननुधृता
स्तमये अनुद्धृते आहवमीये सूर्यास्तमये सति नु श्रा बद्धे दर्भेणावबद्धे
हिरण्ये सुवर्णे पश्चात् ध्रियमाणे गार्हपत्यस्यापरस्मिन्देशे अन्ये
न केनचित् ध्रियमाणे इध्मेनापरिमितकाष्ठेनार्षेयो ब्राह्मण उद्धरे
त् उद्धरणं कुर्यात्। आर्षेय ऋषिसदृशो बहुविद्बहुश्रुतः। बहुविदाश्रा

सरणेनोद्धरणमिति शांखायनः । अत्र हिरण्यधारणात्पूर्वं हरितं हि
रण्यं दर्भे प्रबध्याय श्चाहृत्वाहनीमंत्रे कंचनपुरुषं प्रति यजमा
नो ददाति । स प्रेषितो हिरण्यं दर्भेण बध्वा गार्हपत्यस्योपश्चाद्धारयति ।
अथार्षेयं बहुविदं ब्राह्मणं ब्राह्मणं प्रति यजमानः प्रेषं ददाति । इध्ममा
दायाग्नौ च ८·ह र्लेवा इति सोष्टाविंशतिकाष्ठकमिध्मं त्रिवृन्नबद्धं गा
र्हपत्येभ्याधाय अग्निं प्रदीप्तं तत्तो याम्यमांवं हृत्वाहवनीयखरे स्था
पयति । कुत एतत् । तद्दाहृदयस्याहवनीयमनुद्धृतमादित्यो भ्यस्तमि
यादित्याश्रुपनात्स्यश्च तो प्रेषयो विहितत्वात् । तेन सत्रानुक्तयोरप्य
तयोरनुष्ठानं । प्रेषा याजमानाः नित्योद्धरणगुणविधेरिति वासुदेवः
वैस्मव्याहृतिः इध्मोनेहत्याहवनीयस्य स्थापनानंतरं वैस्मवीवि
स्मुदेवताकाविस्मवेत्याहेत्यनेन मंत्रेणाहुतिरत्र भवति चतुर्गृहीतेन
। कुतः । वैस्मदेव्याहुतिप स्रेशानपथेवतुर्गृहीतस्य हृदत्वेन तत्तुल्य
विकल्पनतयेत्वापित्तथावधारणात् । स चतुर्गृहीतेनेति श्रोषणप्राय
श्चित्तकारिकारी । अत्र पूर्णाहुतिवदाज्यसंस्काराः कर्तव्याः ॥ ॥अ
ग्नये वसुपवते । ततो दक्षिणाग्निमुद्धृत्य तदानीमेवाग्नयोत् सर्पव

अ२५
देवभाष्य
२१

21

तेऽसुरोद्घातो भवति। एकदेवतत्वादाग्नेयधर्मकः। अतोऽस्मात्पालच
तुर्दश्यादिकरणादिकमत्र भवति इष्ट्यां नेतद्धिहार एवाग्निहोत्रं होतव्यं। वि
हारस्याग्निहोत्रापूर्वत्वात्। इष्टिषु प्रसंगत्वात्तदंगत्वात्तु न द्विहार एव भ
वति। आश्वलायनब्राह्मणेऽप्याह यस्याग्निमनुद्धृतमादित्योऽभ्युदिया
दस्तमियाद्वा प्रणीतो वा प्राग्होमादुपशाम्येत्कोऽत्र प्रायश्चित्तिरिति
हिरण्यं पुरस्कृत्य सायमुद्धरेत् ज्योतिर्वै शुक्रं हिरण्यं ज्योतिः शुक्रमसौ
तद्देवज्योतिः शुक्रं पश्यन्नुद्धरति रजतमंतर्द्धाय प्रातरुद्धरेदेतद्वा त्रिरू
पं पुरस्तादभ्युदिताया नामाहवनीयमुद्धरेत्। तेनोद्धृतस्योपशमेऽपि पुनर
द्धरणे हिरण्यरजतयोर्धारणं भवत्येव। अथाहवनीये नुद्धृते सूर्योद
ये जाते प्रायश्चित्तमाह अभ्युदये रजतधारणं पुरस्तात्। अनुद्धृतग्रह
णमिहानुवर्त्तते। अनुद्धृते आहवनीये सूर्यस्याभ्युदये सूर्योदये जाते
सति आहवनीयस्य पुरस्तात्पूर्वस्यां दिशि क्षिप्रं रजतधारणं करोति
। अत्रापि यजमानः पूर्वमन्यं प्रेषयति। रजतः हिरण्यदर्भे प्रबध्य पु
रस्तादुद्धरेत्वा इति संप्रेषितो रजतं दर्भेण बध्वा आहवनीयखरात्पूर्व
स्यां दिशि धारयति। अथ यजमान एवान्यं बहुविदं ब्राह्मणं प्रेषयति २१

रध्ममावीप्यान्वंपश्चः हव्वावाहरन्ति। ततःसपूर्वैवदिध्मामादीप्यान्वं
चंरजतानुगामिनं हस्त्वास्त्वापयन्ति पूर्वस्यां दिशि घृतं रजतमनुलक्ष्मीत्रा
त्यां चतीस्यन्वङ्गतं अग्नेन्वंचं इध्मं वैश्वदेव्याहुतिः अग्निस्थापनानन्
तरं पूर्णाहुतिवदाज्यं संस्कृत्य वैश्वदेवीविश्वेभ्यो देवेभ्यः स्वाहेत्यनेनमंत्रे
ण चतुर्गृहीताहुतिर्भवति सूर्याय चड्योतिष्मते। ततोदक्षिणाग्निमुद्ध
त्यं तदानीमेव सूर्याय ज्योतिष्मते एकाकपालः पुरोडाशो भवति। अयमप्येक
कपालएवाग्नेयविकारत्वात् मध्यते नद्विहारएवाग्निहोत्रहोमः सना
नमुद्धरणं इध्मोनोद्धरेदाधेयो ऽन्यस्माणइत्येवमादिना पूर्वोक्तेन प्रकारेण
समानं सत्त्वशमुद्धरणमत्र भवति। अनुद्धृताभ्यस्तमयवदित्यर्थः तथैव
प्राक्यूर्पं चितं वैश्वदेवी वोभयत्रापुरोडाशावाशाह्योविकल्प्यार्थः अवोभ
यत्रानुद्धृताभ्यस्तराये अनुद्धृताभ्युदये वर्वैश्वदेवी विश्वेभ्योदेवेभ्यस्व
हेति एषैवाहुतिर्भवति। कीदृशी अपुरोडाशा। अग्नये सूर्ये वतेयः पुरो
डाशः यश्च सूर्याय ज्योतिष्मते इति तदुभयरहिता केवला वैश्वदेव्याहुति
रेव भवति। चतुर्गृहीतेन स्रुवेण खावापामुभयत्र तस्याः एवकेवल्यायाहुत्य
नन्तरं उनयामुगमनेपुनराधेयं वा। उभयोर्गार्हपत्याहवनीययोरनुग

मनेज्ञातेसत्यन्यस्तमयेभ्युदयेवपुनराधेयप्रायश्चित्तंभवति।तच्चाग्रा
गुक्तं पुनराधेयमोधानाप्रतिज्ञानस्येत्यत्राभ्युदये अस्तमयेह्यनुप
वर्तितो तेनायमर्थः। उद्धरणानंतरं यदि गार्हपत्यानीयो ह्यावणुरंशातो
ऽज्ञातो वा तदा मथित्वाध्वर्युरेवंबहुत्वाऽनस्तमिते एव पुनरुद्धृत्य होमः का
र्यः। मथ्यमानस्य जननासंभवे च यमत्रूरात्यरापश्येदित्यादिनोपायेन गा
र्हपत्यच्छानलौकिकांग्न्यादिच्छापयित्वानस्तमिते न तस्मादुद्धरेणमाहव
नीयस्य कर्तव्यं। तदपि वेन्नत्तजं तदा उभयोरनुगतयोरस्तमये अभ्युदये च
पुनराधेयं वा भवति न्यायप्राप्तमग्न्याधेयं वा। को न्याय इति चेत्। उभा
वनीं ग्नावनुगतावुद्धृत्यामृत्यावुगतदुत्यति श्वा ग्न्याधेये न भवति। यद्येवं पु
नराधेयं कुर्वी भवति। वाक्यात्। तस्य। भा वग्नी अनुगतावभिनिम्लो
चेदभ्युदियाद्वा स एव तस्य पुनराधेयं प्रायश्चित्तिरिति। एवं चेत्पुनराधे
यमेव भवति नाग्न्याधेयं। न हि न्यायो वाक्येन विकल्पयितुं शक्यते
। केचित्विकल्पमेवाहुः तथा वा यरत्न बः।। ।। यद्यरण्योः समारूढो
नश्येद्यस्य वो भावनुगतावभितनिम्लोवेदभ्युदियाद्वा पुनराधेयं तस्य
प्रायश्चित्तिः पुनराधेयमित्याश्मरथ्यो ऽस्याग्न्याधेयमित्यालेख

नइति। एतच्चाख्याभिनिप्रोषिते आगमनपर्यंतमुक्तं। सव्यां तदुक्तं स्म
गन्याधेयादिकं प्रासमुभयानुगमादिनाख्याभ्यागमनपर्यंतमुक्तं। स्वय
मसंशयांमपित्यापाववसर्वं प्रायश्चित्तं विधाय च भित्रायेत्यादि भिर्कु
त्वाद्वादशानुगमाहुती:। अग्निहोत्रं यथाकालं नित्ये हि प्रसमाचरेत्
आख्याभ्यागमनाज्जिष्ठे दागत्याथादधीतस इति। एतच्च एतयो रनुगमन
ज्ञानानंतरमस्तमयोदयेसति भवति। नास्तसयोदयानंतरमागत्यो रनुग
मनपरिज्ञाने तथा च मंडनः उभयोर्नाशविज्ञानादूर्ध्वमर्कोस्तमे
ति चेत्। कर्कोग्निना शमावस्थे पश्चाद्विज्ञातेपि नेष्ठ्यतीति।। अग्निहोत्रा
र्थमुद्धृतेष्वेवैतस्यायश्चित्तं। नेश्यर्थमुधृष्युः। तत्रैव दृश्याख्यांतरे श्रवणात्
तथा च मंडनः अन्वाहितोभयपक्षसोप्यग्निनाशो न विद्यते। अन्वा
हितविधि:कार्योहव्यवाद् द्वयोः पृथगिति भेदेनाप्युपयातात्। भेदे
नापि अन्यतमोपशांतावेयादपुनराधेयं प्रायश्चित्तं भवति। कस्मादु
पपातात्। एकस्याप्यग्नेरुपशमे उपपातो भवेंस्येवायमुभयपक्षे न
विशेष्येते। तद्वा वाक्यभेदः स्यात्। तस्माद्वै कस्याप्युपशमे पुनराधे
यं भवत्येव प्राप्ते आह नसहप्रतप्ते:। अन्यतरानुगमनेपि पुनराधे

अ२५
देवभाष्य
२३

23

यं भवतीति वचनात् । तत्रतः कुतः सहप्रवृत्तेः । सहैव प्रकल्पितागार्ह
पत्याहवनीययोरुत्पत्तिः । नन्वाधाने नैवं कुतः साद्यितुं शक्यते । त
स्माद्द्विशिष्टउभयाग्न्यनुगमएवात्र निमित्तं । तदन्यतरानुगमः । ते
नाप्येकस्याहवनीयस्यानुगमनेऽस्तातेऽुदयेऽप्यस्तमयेवे धन्ये नोद्धरणं
द्विवतितस्माद्द्विशिष्टउभयाग्न्यनुगमएवात्रउदयास्तमयात्प्राउय
शमेह आपूर्वमेवा । कुर्वीसादनोत्तरकाले प्रा । होमादग्निहोत्रआ
सन्नेष्वेवेदित्यादि । पूर्वाहुतेरनंतरं पूर्वाहुतौ हुतायां वेदिपक्षत्रयं प्राउ
त्तराहुतेरुद्धमप्येवमेवान्यस्यानुगतावानाः । दक्षिणाग्नेरनुगमेप्येवंपु
नराधेयेधावर्जं समानन्यायात् । पुनराधेयं समास्यानंतरं चास्मिन्नेव धि
होत्रहोमः । अग्नेस्तवर्णाग्निधारणादिनियमाश्रयत्रनवं स्येवेति । पु
नराधेयनिमित्तानि पद्धतावेवदर्शितान्यस्माभिरितिचेह पुनः प्रद
र्श्यन्ते आश्वलायनब्राह्मणे यद्विसर्वएवाग्नयउपशाम्यरनः कान
त्रप्रायश्चित्तिरिति सोऽग्नयेतपस्वतेजनद्वतेपावकवतेष्टाकुपालंनि
र्वपेत्तस्ययाज्ञापुरोडाशानुवाक्ये आयोहितपसाजनेष्वानोपाहितप
साजनेष्विस्वाहुतिवाहवनीयेजुहुयात् । दग्नयेतपस्वतेजनद्वतेपाव २३

कवतेस्वाहेति। सूत्रे च। सर्वोश्चेदमनुगतानाहित्योभ्युदियाद्वाभ्यस्तमि
पाद्याग्रयणस्थाल्यास्तस्मिन्नुन्नयने द्रोणकलशेऽस्य सोममाग्रयणस्था
स्यैवकारणभूतयामिनीयन्नतो एकधनस्थे जले स्वस्याप्यायनं
कृत्वा द्रोणकलशात्सोमकार्याणि कुर्युः । आनीता चेद्दक्षिणासु भेद
ने पूर्ववद्द्रव्यान्तरस्यैव यजतः । चेद्यदि दक्षिणा स्वनीतासु आहृताद्रोणक
लशस्य भेदनं भवति । तदा पूर्ववदेकांगाद्रव्यान्तरस्यैवयत्नः । अवम
यातएवपुनः स एवयज्ञो भवतीयं ; प्राकृतिकप्रमाणः । अदिन आर

भ्यादीप्य प्रवेशनांतः सयघ्नीनामुदक्षिसुकलशोदीर्यतनत्राप्येका
११६ मेवगां दद्यादथोवमथादेयों नोदेसपुनर्दः क्षेनेति श्रवणान् नीता
त्वयि दक्षिणा सुकलशेदीर्णे पुनर्यज्ञः स्यादेव अपरे घपि निमित्ते धेव
116 मेवेति हरिस्वामिनः कारिकायां मिधेन दक्षिणादाना भ्याग्न्हो एक
लशो युद्धि सोमापहारवत्तत्र पुनरावर्तयेत्क्रतुं मिधेन दक्षिणादानाद्
न्तरं कलशात्तदा ब्राह्मणोच्छंसिनस्तोत्रं वषग्निधनमाचरेद्धिति अ
थ सोमातिरेके प्रायश्चित्तमाह १२ प्रातःसवनाच्चेत्सोमोतिरिच्येतत
मुन्नीयोपाकरणं चेद्यदि प्रातःसवनाद्दक्षानवाकवोक्थ्य विग्रह संबं
धिचमसोन्नयनानंतरं पूतभृति सोमोतिरिच्येतातिरिक्तो भवेत्तत्र म
सेषु पूर्णघपि पूतभृत्सवशिष्येततत्तहोक्थ्यांनेन मतिरिक्तं सर्वमपि
सोमद्रवमुहोत्राद्दीनां चमसेषु विभागेनोन्नीयहारणाभ्यांहोतन्चमस
मुपस्थत्रयोपवर्त्तमित्यनेनैवमंत्रेण स्तोत्रोपाकरणमनुमात अत्रा
च्छावाकेक्थ्यस्य पात्रप्रक्षालनां ते हजेकालाद्गतिवाचने हालेतक
नीयं एवं माध्यंदिनसवनादिष्वपि द्रष्टव्यं अतिसोमो अयंमिति ११६

मरुत्वतीयुग्रायपत्रेणास्तवीरन् उपाकरणानंतरमुन्नातारोऽस्ति सोमो
अयुमुत इत्यादिकासुगायत्री छंदस्कासु मरुत्वतीषु मरुच्छन्दवतीषु सु
गायत्रेण साम्नास्तुवीरन् यदि प्रातःसवनान्सोमोतिरिच्येतास्ति सोमो
अयमुत इति मरुत्वतीषु गायत्रेण स्तुयुरिति तांड्यश्रवणात् तथामा
नवैर्वा यदि सोमोतिरिच्येत होतृचमसमुख्यानुन्नीयास्तोत्रमुपाकरोऽसे
द्रो वैसवं होतानुशंसति यदि प्रातःसवनेऽस्ति सोमो अयमुत इति मरुत्व
तीषु गायत्रेणास्तुरिति काले ह्यतिवाचने चापूर्वं नवृत एवा अस्ति सो
मो अयमित्यस्योपाकरणमंत्रत्वं बह्वादिभिर्ज्ञ ह स्तं न त्विमें लत्वादयु
क्तं ऐंद्रावैसवं होताशंसति ततस्तोत्रानंतरमैन्द्रावैसवं शस्त्रं हो
ताशंसति यस्मात्सोमादतिरिच्येत स एव कार्यः सर्वत्रायस्मात्रिंह
त्यचदशसप्तदशेकविंशाहेस्तोमात्सोमोतिरिच्येत प्रातःसवने अ
छावाकोक्थे यस्त्रिंहदादिस्तोमो भवति स एव प्रायश्चित्तार्थस्तोत्रेऽपिका
र्यः नकेवलमत्रा किंतु सर्वत्र माध्यंदिनसवने तृतीयसवने चेति सर्वत्रे
त्यस्यार्थः माध्यंदिनेऽपि सवने अत्युक्थ्यस्तोत्रे यस्त्रिंहदादिस्तोमस्त

देवभाअ
११७

117

त्रसोमातिरेकनिमित्तस्तोत्रेपिसएवकार्यः एवंतृतीयसवनेपियज्ञायप
ज्ञियांतेअग्निष्टोमेमुख्यषोडश्यंतेउक्थ्यांतेषोडश्यंतेवाजपेयाति
रिक्तस्तोत्रांतेसंध्यंतेअप्तोर्यामांत्यपर्यायांत्यस्तोत्रांतेचसोमातिरेके अ
तिमतस्तोत्रस्तोमएवसोमा‒ ‒ ‒ निमित्तस्ते‒ ‒ भवति माध्यंदिनाख्येस
र्ववदुपाकरणा वेवेघदिमाध्यांदिनान्सवनान्माध्यंदिनसवनांतिमोक्थ्या
चमसोन्नयनानंतरं पूतभृतिसोमोतिरिच्येत अवशिष्यतेतदापूर्वव
द्धोतृचमसादिषुद्रोणकलशसुचमसेषुतमतिरिक्तसर्वमपिसोममुन्नीयपत्न्या
भ्यांहोतृचमसमुपस्थ श्योपावर्त ध्वमित्यनेनैवमंत्रेणोपाकरणंकर्त
व्यं बएमहां२ अंसीतिवृतीयादित्यवतीभुगौरीविनेनकावीरन उद्गा
ताएवएम हां असीत्यनावृहतीछंदस्कासु आदित्यवतीषु आदित्य
ग्रहवृयुक्तसुगौरीवितेनगुरुवीतिनारूपेणाहछेनसाम्नास्तुवीरन एवमि
होता स्तोत्रानंतरंहोतापूर्ववत्तएंद्रावेस्मवशंसति तृतीयसवनाख्योहि
स्तोमः शिपिविष्टवतीभुगौरीवितेनावेघदितृतीयसवनान्नृतीयसवनेति
मस्तोत्रचमसोन्नयनानंतरंपूतभृतिसोतिरिच्येत तदापितमतिरिक्तंसर्व ११७

मपि सोमं होतृचमसादि दशचमसेषु विभज्यान्नीयनुएताभ्यां होतृचमसं

समुपस्थस्योपावर्तध्वमित्युपाकरणं कुर्यात्। तन्तदुद्गातारः विष्णोः शि

पिविष्टवतीषु विष्णोर्देवतायाः प्रतिपादिकायाः शिपिविष्टशब्दवत्य

स्त्र चरन्तासु यज्ञायज्ञीये चिततंते नस्तवीरन्। होतुश्च विशेषानुपदेशो दैक्षावैरू

वमेव शस्त्रं तृतीयसवनांतिमस्तोत्रं चाग्निष्टोमसाम यज्ञायज्ञियादिकं

पुष्कलो षोडशीवा। अच्छावाको छन्दं वा षोडशीस्तोत्रं वा वाजपेयातिरिक्त

स्तोत्रं वा संधिस्तोत्रं वा। अप्तोर्यामान्त्य पर्यायांस्तस्तोत्रं हे तिन। एतत्तत्कृत्वा

। एतस्मायश्चित्तं कृत्वा ततः प्राकृतं कर्मनुर्यात्। अथ तृतीयसवने सोमा

तिरेके ऽग्निष्टोमादिषु स्वस्थं सुकं प्रायश्चित्तांतरं वैकल्पिकमाह—आउच्छं

वा गृहीत्वा विगृह्णीयात्। अथवाग्निष्टोमे तृतीयसवने यज्ञायज्ञीयच

मसोन्नयनानंतरं पूनर्भवन्ति एवोक्थ्यस्छाल्यामुपयाम गृहीतोसी न्द्राय

त्वा बृहद्वत इति मंत्रेणोक्थ्यं गृहीत्वा साधनतो विगृह्णीयात्। उक्थ्यविग

हणमुत्तरेषि प्रावरुणाभ्यामिंद्राबृहस्पतिभ्यामिंद्राविष्णुभ्यामित्यनेन

प्रकारेण विग्रहरूपंकुर्यात्। यद्यत्यः सोमो तिरिक्तो न वेत्तदा प्रायुक्तमेव

कुर्यात्तत्र बहुश्चेदुक्ष्यविग्रहणं पक्षं कुर्या उच्छ्रये हि विग्रहसमाप्तौ वा रत्न
यदृश दश चमसाहृयन्ते। तेनातिरिक्तः। सर्वसोमत उपयुज्यत इत्यभिप्रायः
अथ सोमातिरिक्तं नाय यथाग्निष्टोमम तिरिच्येत पूतभृत एवोच्छ्रयं ग
ह्णीयादिति श्रुतेः। सोमोतिरिक्तो येषां नु वर्तते सोमातिरिक्ताः। ते षांकर्मेव
क्ष्यत इति शेषः। यदि तावदग्निष्टोमसंस्थं प्रक्रान्तं सोमोतिरिच्येत न सर्व
स्तोत्रोपयुक्तः स्याहित्यर्थः। ननु उच्छ्रयन दुपयोगायगृह्णीयात्। तस्य वो
क्ष्यस्यान्तःपवित्राद्ग्रहणं प्राप्तमत आह पूतभृत एवोच्छ्रयं गृह्णीयात्रान्तः
पवित्रादिति। अत्र चोच्छ्रयग्रहणे चोदनायैव विग्रहाणं स्तोत्रमस्य
चमसोन्नयनहोमादि वो दितमिति हरिस्वामिनः उच्छ्रयाच्चेत्षोडशी क्रा
र्यः। उच्छ्रयसंस्थः प्रारब्धोपि निमित्तवशात्षोडशी संस्थः कार्य इत्यर्थः
तद्वेव प्रत्यक्तः षोडशिनं स्वाहिरण्यं चतुःस्रक्तिं नोलूखलेनातिष्ठे
ति मंत्रेण गृहीत्वा याव्यवमसानुन्नीययसमान्तजात इति षोडशिन
मुपस्थापयत्यास्तमसमीपे क्लृप्ते प्रसमीपे स्थितेन तेण भ्यां षोडशिन
मुपस्थस्यतत्णाहिरण्येपेः स्तोत्रोपाकरणं कार्यं सोमोत्यरेच्यपावर्त्तेध ११८

मितिमं त्रेणोयष्ट स्तुमतिरिच्येन षोडशिनस्तुपेयुरितिश्रुतेः। तत्राविद

शस्तुव मसेषु निरिज सोमडपसुतो मविणतीत्यभि प्रायः। षोडशिन श्वेद

तिराचः चेदत्तु दिषोडशिनः षोडशि संस्था पूर्वमेवार भ्यातेोडशिन श्चम

सोन्त्रयनानंतरं यदि यजमानस्य तिबहुलः सोमो निरिक्तो भवेत्तदा सषो

डशिसंस्थः प्रारब्धोज्योतिष्टोमोतिरात्रो निमित्तवशादतिरात्रसंस्थः

कार्यः। अतिरात्रस्य स्योमेतस्महाग्निनो द्विकपालः सर्वत्रत्नयाः पर्या

याश्चमस्तेरित्यादि आश्विनस्य पात्रप्रच्छा स्यनांतंकार्यः। निमित्तानंतरा

भवसेनि पन्योपकारकेरंगैराश्विनं द्विकपालं पुरा २ डाशं प्राप्याचोत

त्वा ततः पर्यायारंभः। यदि षोडशिनमतिरिच्येतरात्रिमुपेयुरितिश्रु

तेः रात्रिशब्देन स्यं तत्र प्रसिद्धा नि द्वादशप्रदानानि रात्रं पांचे

वैकं दश मिद्दश मिश्चमसैस्तोत्रेवत्त्रयोदशंतीरोक्तीयचमसप्रदानं धे

ः स्तो त्रमाश्विनं च शस्त्रमेनामी दृशी रात्रिमुपेयुहरितिविभिनेः। अन्य

ग्निष्टोमवाजपेययोरुक्तविशेषानुक्तेस्तृतीयसवनाध्वेद्दि ध्मोः शिपि

वि ष्टवती पुरोरीवानेनेत्ये नहेवभवतिवासुदेवमहात्तु अग्निष्टोमाने

119

स्तु घृषोडशिनं वानुच्छ्यं वा। योग्निशिनितु वाजवेर्ये तिरिक्तं वातिरा
त्रं चेत्स्य च्छयं वा गृहीतेनि वाशद्रार्थमेवमाहुस्तत्तुनिर्मूलं। अतिरात्रा
ग्नेष्टु त्वहनं चेद्घृषान्ति एत्वसंस्थाप्यास्त्वाद्दाक्षिणार्थं चमसेषु नानेष्टुप्तं
न तिसोमोतिरिच्येत तत्तदादुपयोगाय हृहत्ता। विस्मोः शिपिविष्टवती पृष्ठ
न्साम कर्तव्यं। शाखांतरात्तात्। नन्वापि हि तावमससमुख्यान्दश चमसान्नुन्नी
यशस्त्वांन्ते मदानं कार्यं। महाव्रतमेवेकं यथोक्तं एके आचार्या अति एवा
अतिरिक्ते सोमे तदुपयोगाय महाव्रतं साम यथोक्तं यागवाम यन्तेडतं
पृष्ठे पावकस्तम्बाएोन शनं नंपुन्नेस्मादिनात्तथानु नुवंति शाखांतरात्
। एतत्त्व साग्निकेति एव सोमोतिरेके नवति अनग्निके वचनात्। असो
र्यामो वा॥ अथवाति रात्रान्सोमेति एके अधिकारवशाद् इति रात्रस एव
प्रारब्धोपि निमित्तवशाद् सोर्यामः कार्यः। यद्दिरात्रिमतिरिच्येत नाहरुपे
युरिति श्रुतेः। यदि रात्रिं प्रक्रांतां सोमोतिरिच्येत ततो हरूपेयुः तत्र पूर्व
स्मादेवाप्यनुक्रमणाद् सोर्यामान्यकम्। हरि निगम्यतोतत्त ष्यातिरो
द्वीपेम्यवुं देवरात्रिपर्यायपञ्चमः कार्यः इति हरिस्वामिनः। अन्या चेतस्ये ११८

वाहृत्तिर्नातीरेकोस्तीति श्रूतेः अंते मवांत्योत्तोर्यामांत्यपर्यायः अंत्या
द्दशोर्याम पर्यायाद्दंतिमस्तो त्र चमसोन्नयनानंतरं यद्दिसोमोतिरि च्ये
त तत्रानस्येवाप्तोर्यामांत्यपर्यायस्येवाहृत्तिर्भवति। कस्मान्नातीरेको
स्तीति श्रूतेः। नैत्येवातीरेकोस्तीति श्रवणात्। न्यत्र षोडशोर्यामांत्यपरं संख्यां
तरं भस्मातिरिक्त विनियोगाभावात् तस्मादृशोर्यामांत्यपर्यायाद्दधिको
तिरेकः संख्याधिकानां त्यवतेन तस्येवाहृत्तिरिति। कर्कोदयसंसुप्तएन
तत्कृत्वो च्छुं वाग्रहीत्वे सेकमेवस्तं व्याख्यायो च्छ्व विग्रहणादीनां
एव वेनेतन भाय श्चित्तेन संमुच्चयं विकल्पेन वर्णयंतितन्नोपपद्यते
। तां उच्छ्रुति विरोधात्। तांउचो हि श्रूयते पूर्वोन्सवनाहृतिरिक्तस्यो
त्तरे सं पावनमेकेनं निकामयमानो भ्यातिरिच्यत इति श्रुतेः एके आ
चार्याः पूर्वान्सवनादतिरिक्तस्य सोमस्योत्तरे सवनेन ग्रहणं प्रातःस
वनातिरिक्तस माध्यंदिनेमाध्यंदिनातिरिक्तस्य तृतीयसवने संपावनं
पवमानकाले ग्रहणं ति पूयमानेन तत्तत्सवसोमेन सह पावनं कुर्वीत
पूर्वसवनातिरिक्तं सोमम ध्याएवास्मिन्काले प्रक्षिपंति। तु न एतत

नंनिकामपमनोभ्यति रिच्यनइति श्रवणान्तानमुत्तरं सवनसोमंनिकामपघ्नानोनितरामभिलक्ष्यन पूर्वसवनसोमोभ्यतिरिच्यते अप्राप्तेपति रिक्तोभवतीतिश्रुत्यर्थः कालातु निवाचने चात्र पूर्वेभवतएवतएवत न्विस्मिन्पक्षेततीयसवनेसोमेऽति रिक्तेकिं कर्तव्यंतत्तउत्तरस्य सवनस्याभावाद्व्याशंकायामाह ततीयसवनाच्छेद्दीरियोजनेवनीयहोमः।चेद्यदि ततीयसवनादग्निष्टोमादिषु क्रतुषु यदंतिमंस्तोत्रं तद्यमसानवसनानंतरं पूर्तमस्यति रिक्तस्यसोमस्यहुरियोजनेग्नहेऽवनीयहोमाकलशेगृहीतस्यहरियोजनस्य मध्येति रिक्तस्यसोमस्यप्रक्षेपं कृत्वाहोमकार्यः एतदन्यक्रतुपुरुच्छयान्पन्यस्यापेपुरिस्याद्विस्त्वश्रुतावपि यद्यग्निष्टोममतिरिच्येतपूर्तनतएवोच्छ्वांगृह्णीयादित्यत्राग्निष्टोमादतिरिक्तेऽरान्यस्मिन्चिद्विधायेवोच्छ्यग्रहणादि विधानातत्रानयोमानवपियदि ततीयसवने विद्गमो शिपिविष्टवती बृहतोरीवीतेनस्तुपुरुच्छयानिवातिप्रणपेयघ्यच्छ्वंपाति रिच्यतषोडशिनं षोडशिनंवातिरात्रंयद्यातिरात्रा हिगमोः शिपिविष्टवती बृहतां स्तुयुरितिअ १२०

नेन प्रकृतेन सह विकल्पस्यैवोक्तत्वात् । तेन प्रागुक्थ्यसंस्थातोऽतिरेके सं
स्थांतरं वा गौरीवितं वा तृतीयसवनातिरिक्तो भवतीति विकल्प एव न स
मुच्चयः । वैकल्पिकं संस्थेत्वतो सोमातिरेके षोडशिसामाहो ग्र्यं यथाक्तं ताद्धि
संस्थस्य चेत् ततः प्रागतो पूर्वस्याः संस्थायाः ऊर्ध्वमतिरिच्येत तर्हि तीयां वा सं
स्थां प्रणयेदेकस्तोत्रं वोपदध्यादिति अथ यत्तो पूर्वस्याः संस्थायाः अतिरि
च्येत तर्हि तीयां वा संस्थां प्रणयेदेकस्तोत्रं वोपदध्यादिति अथ सर्वेषु सव
नेषु सोमातिरेके पक्षांतरमाह अस्मिन्नपि ह जीर्णमिश्रस्यापवहरणं
। तृतीयसवनातिरिक्तस्य सोमस्यापहारियोजनमग्ने प्रक्षेपस्यास्मिन्नो अ
स्मरणे संनिनस्यातिरिक्तसोमस्य ऋजीषमिश्रस्याप्सवहरणं कार्यम् ।
ऋजीषनुं भवतीयं नु नमजनसमपे ऋजीषमिश्रस्यैवाप्सु प्रक्षेपः का
र्यः । अतिरिक्तसोमस्यास्य तेनाति बहुलत्वेन चोक्तप्रकारेणोपयो
गासंभवे अयं पक्षः । संभवे यक्तिके चित् । सर्वत्र कालाहुतिर्भवत्येव वा
चनं चोऽतिक्रान्तनिमित्तेषु सोमे कालहुतिर्भवेत् दिति कारिकायां ।
सर्वत्र सोमापहारादिषु परमेष्ठ्यादिहोमोऽप्यस्ति । कल्पं श मे इनेत्य

त्रषायश्चित्तमधिकृमितिहरिस्वामिनः। दीक्षितस्येहुपतत्ययेतेष्वा
नांयेनेच्छेत्तेनविधिः। सततस्तोनिष्टोमादौ चेद्यूहिदीक्षितउपतप्येत्त
दुपत्तोज्वरादिरोगेणाभिभूयतेतदाष्वानांप्रथमत्रैतेमक्षितानामौ
षधानांव्रीहियवादीनांसर्वसुरभीणां च मुंठीपिप्पल्यादीनांमध्येये
नेच्छेत्तविधिः। सकोवैषधयेनौषधेनविधिः। स्मितुमिच्छेत्तज्ज्वरादिरोगा
पतप्यनंकर्तुमिच्छेत्तेनविधिः। सेतत्निषधुसतज्वरादेः प्रतीकारं कुर्या
त्। अत्राषिकालाहूतिवाचनेमवतइति संप्रदायपहुतोष्मा। अग्नीध्र
मेनेनयनेतिप्रयाख्यातं चेत्। चेयदिदीक्षितस्यज्वराद्युत्पत्तिसमये
आग्नीध्रं कृतं निष्पादितं भवति तदाध्वर्युर्यजमानपुरुषान्प्रति अ
ग्नीध्रमेनंनयनेतिप्रेषं ब्रूयात्। अकृते त्वविशेषात्। अकृते प्वनि
ष्पादिते प्वाग्नीध्रेम नय्वितिप्रेषोदेयएव। कस्मादविशेषात्। तत
स्मात् दीक्षितानामवन्यंविदेदाग्नीध्रमेनंनयेति ब्रूयादित्यविशे
षणेश्रवणात्। नत्वकृते आग्नीध्रे प्रेषदत्तेपि आग्नीध्राभावान्नयनं
कथंकर्तव्यमित्यत आह तद्देशो वासः। तद्देशेतस्याग्नीध्रस्यदेशेप १२१

स्मिन्प्रदेशे आग्नीध्रं भविष्यति तस्मिन्प्रदेशे ज्वरएघृपनस्य दीक्षित
स्यावासोनिवासोभवति। ज्वरादिरोगशांतिं यावन्नात्तनोविशेषे देवा ऋम
नत्वमपाजयं तद्दनार्ततन्ना रिष्यतीत्येवमादिना तत्प्रदेशस्य नीरो
गत्वप्रतिपादनावासनावरमुदकमाचमेदित्येके चात्वालमागताम्प आ
पः प्रजापतिर्यज्ञो यज्ञस्य मे अजनमसीति। यद्वाप्सुत्पादिनेऽपररात्रेऽग्ना
त्वाचात्वाले वसतीवरी निरिति प्रेषिते नाग्नीध्रेण वसतीवर्यर्थं चात्वालेआ
नीयं ते। तद्दानाम्प मन्त्र चात्वाल गताम्भोवसतीवरीम्यउदकमादाय यः प्रजा
पतिर्यज्ञइत्यनेन मंत्रेण ज्वरादिभिभूतेदीक्षित आचामेदाचामनं कुर्या
दित्येके आचार्या आहुः। अनुसवनमेनमालभेरन्। एवं ज्वराद्यभि
भूतं दीक्षितं सर्वे ऋ॰त्विजोनुसवनं सर्वेषुसवनांतेषु आलभेरन्स्प
र्शेत्। तत्र प्रतिसवनं पृथगालंभमंत्रानाह। आवसवः एतद्धः प्रातः सवनमि
ति। अनेन प्रातःसवनयजमानमालभेरन्। रुद्रा आदित्यांश्चोत्तर
योः सवनयोः रुद्रा एतद्धो माध्यंदिनं सवनं तद्रक्षध्वमिति आदित्या
एतद्वस्तृतीयसवनं तद्रक्षध्वमित्याभ्यां मंत्राभ्यामुत्तरयोर्माध्यंदिन

सवनन्तनीयसवनयोर्यजमानमालभेरन्नृत्विजः सवनमसमाप्ते सोमप्र
शीतः प्रसुही त्यस्मादनंतरं म्नियेते चेन्निमेध्यो न दग्ध्वा शामित्रा
ह्यस्थीन्युपनह्य नेदिष्ठिनमुपदीक्ष्य तेन सह यजेरन्नाचे द्युदि एव
मार्गी धीये चिकित्स्यमानापि दीक्षितो म्नियेत। मरणं प्राप्नुयात्तदा निर्म
थ्यनखारणिभ्यां तदानीमेव मथितेनाग्निना दग्ध्वा शामित्राह्यश्मा
मित्रैकदेशेन वा दग्ध्वा श्रौतस्मार्तविधिरहितं दाहमात्रं कृत्वा तस्य दी
क्षितस्य दग्धस्यास्थीन्युपनह्य शाखं तरणे कृष्णाजिने बध्वा नेदिष्ठि
तं तस्य समीपवर्तिनं भ्रातिदेयनां तिकतमं पुत्रं भ्रातरं वा तस्य प्रति
निधिभूतं उपदीक्ष्य पित्वानेन नेदिष्ठिनामृतोपकारार्थं प्रवृत्तेन सह ए
कीभूय इतरे सत्रिणो यजमाना यजेरन् समापयेयुः तथा च मानवे यः
दि दीक्षितः प्रमीयेत तीर्थेनारणी हत्वा तीर्थेन शरीरं दक्षिणेनो विहार
स्य निमथ्य नदग्धास्थीनि कृष्णाजिने स्थीन्युपनस्य प्रेताग्नि पुत्रं भ्रातरं वा
दीक्षयित्वा यजेयुरिति। एतावद्देवनैमित्तिकं। अत्र च नेदिष्ठीय यद्यपि स्व
यमसत्रफलार्थेव प्रवृत्तस्तथापि मृतपित्राद्यधिकारसमर्थनाय यत्वाच १२२

निवयस्यात्र प्रवृत्तिरिति यजमानसंस्कारा एतत्तरसचिवस्यापि भवंति। या
नितु मृतस्य पूर्वं पुरुषैः सह नामधेयग्रहणादीनि संभवंति न तान्यत्र प्र
तिहन्ते प्रवर्तंते। तथा चोपमं यस्य त्रां प्रेतस्यैव पूर्वपुरुषैः सह नामानि ग
हीष्यु रितित्त यागनयस्तु मृतस्य संबंधिन एवं वयेमध्येवर्त्तते तत एव ये तु ने
ष्टिष्टिन स्तेगृहे पुंति संलिनि निस्यानिक्रमो तिते षस्यान्निं यंते। प्रवास
गतस्यापेनापरण ये प्रवहन लाहुः। अन्ये निस्यानां निवृत्तिः पत्स्यापि मृतस्यैव
तत्र पत्नी कर्म करोति ते दिशीतु यजमानकर्मैति धूर्त्त स्वामिनः सत्रग
णयज्ञे सहत्वश्रावणात्। एतत्सूर्वस्त्रोत्रं दीक्षितमरणात्तरं यत्क
र्त्तव्यं। तत्सत्रेगणयज्ञे च भवति नान्यत्र। कस्मात्सहत्वाश्रावणात्। तेन
सह जेरन्निति सहत्वश्रवणात्। सह यजनं च सत्रगणयज्ञोरेव भवति
तयोरनेकयजमानसद्भावान्नान्यत्रातस्तु एकयजमानके दीक्षितम
रणानंतरं किं कर्त्तव्यमित्यत आह। एकयजे दर्शपूर्णमासवत्। ए
कस्य यजमानस्य यजनं तु यज्ञो निष्ठोमादिः तस्मिन्नेकयज्ञे एकयजमा
नके जज्ञे दर्शपूर्णमासवद्भवति यजमाने मृते कर्त्तुरिशावान्यरणांतमे

देवभाअ
१२३

123

वभवतीत्यर्थः। तस्य संदीपनवन्यधिकरणोदिना विधिवदेवदाहः का
र्यः पत्नीमरणेप्येवमेव। एतत्कृत्वा राजानमभिषुत्याग्रहीत्वाग्नेहानद
क्षिणपूर्वस्यां दिशि नद्यां यामेनमुवीरंति स्म सुपरीक्षुसार्पराज्ञीषु। एत
त्पूर्वोक्तं निर्मथ्येन दग्ध्वातो दिक् यथोपदिष्टं कृत्वा सोऽत्रेह नि राजानम
भिषुत्य सोमाभिषवं कृत्वाग्नेहानैद्रवायवादीनगृहीत्वा दक्षिणपूर्वस्यां
वेदिकानद्यां वेदेदक्षिणेसेति सम्पुनि संख्यासुपरा क्षुपराऽनुरवीषु अना
हतासु सीर्पराज्ञीषु सर्पयंगोरित्याघासुकृत्सु यामेनसाम्नाएतत् वीरनु
हानारोदक्षिणेनमुखाः प्राचीनावीतिनः सत्रांत्यरेतयाहर्शनात्। अ
त्र शांखायनः। यदि दीक्षितः प्रमीयेत दग्ध्वास्थीन्यकृत्वा पनत्यपुत्रं भ्रात
रं वा दीक्षयित्वा सह यजेरन्नभिषुत्य वा राजानमगृहीत्वाग्नेहां दक्षि
णापरस्यां वेदिश्रोण्यामस्थिकुंभं निधाय तस्मिन्देशे सार्पराज्ञीभिः
स्कवतेमाजीलीयदेशे वान्निः। प्रसव्यं परियंति मार्जालीयं सव्यानूरू
नुपाघ्नाना इति। अग्रहीत्वाग्नेहानि सुकेष्वपां स्थंतर्यामयो नप्रतिषे
धः। तदुक्तं कल्पकृता। अनभिषुत्याप्यसोमं दृतयोः पात्रं स्थंतर्यामपो १२३

गृह्यातेषितरेषु गृहेषु पूर्वया द्वारोपनिष्क्रम्योत्तरेण मार्जालीयं दक्षि
णामुखा आसीना यामेन साम्नास्तुवीरन्निति मार्जालीये वा। अथवा
मार्जालीयेन समीपे यामेन साम्नास्तुवीरन्निति स्थानविकल्पः। स्ते
मार्जालीयं त्रिः परियन्त्यप्रसव्यं सव्योरून्नाघ्नानाः स्तोत्रिया
जपन्तः। यामेन साम्नास्तुवते सर्वे दीक्षिताः सव्योरूनाघ्नानाः सव्यान्या
मानूरून् दक्षिणहस्तेन कुर्वन्तः। अस्य साम्नः स्तोत्रिया यं गोरिस्मा
घाजयन्तः संज्ञाप्रसव्यमव दक्षिणं मार्जालीयं त्रिः परियन्ति त्रिर्वा रंप
रितो गच्छन्ति। अत्र परिगमनानन्तरं होता तस्मिन्नेव देशे उपविश्य
प्राचीनावीति दक्षिणाभिमुखः सार्पराज्ञीः शंसति तथा च शंसत्स्वप्यनस्
त्रैः सार्पराज्ञीर्होतान्निगदेह संमितं स्तोत्रमिति सूत्रस्त्रैः जनाचोनुक्रान्त
नखैः प्रसव्यं मार्जालीयं पुरीषु सव्यानुरून्नाघ्नानाः पुनस्त्रिः प्रदक्षि
णं प्रति परीत्यासंस्य शं नो नये क्षमाणाः। प्रसव्यपञ्चापपद्ययस्य शेषेद्वावायवा
ग्मानग्रहीरं त्रिरिति एतावन्मृतोयकाय एव कृतं कर्म अग्न आयूंषि पव
स इति प्रतिपद्भवति। अस्मिन् सन्याहे अग्न आयूंषि पवस इति प्रतिपत्सव

मानस्य प्रथमं कृत्यं भवति। अहीनेषु सत्त्रेषु चैतन्निमित्तमेकस्मिन्नेवा
हनि भवति प्रत्यहं विधानाभावात् सहकृतेनापि शास्त्रार्थस्याःकृतत्वा
च्च। संवत्सरेऽस्थीनि याजयेयुः। संवत्सरे पूर्णेऽस्थीनि याजयेयुः सत्त्रिणः
अस्य कर्मणो मृतोपकारार्थत्वं। महागतानां विधोवक्ष्यमाणेनांऽनुबान्ध्य
णो मृतानां याजनुर्वंतीत्यनो वाकाशो मा याजयेयुरिति च परस्मैपदान्तस्थाप
ते। अन्यथा हि यदि नैमित्तिकमेवमिदं जीवतामेव स्यात्तदा सह प्रजेरन्नि
ति वक्तुर्नभिप्रायस्त्रि याप्यजविवक्षाप्यामात्मनेपदं स्यात्तः यानि पूर्वमुपन
त्युस्थ्युपितानि दग्धान्यास्थीनि तानि संवत्सरे अर्थादनीते याजयेयुः। अत्र
वानयथा शास्त्रे दर्शनयस्ति। कदाचित्सत्त्रिण एवोद्गवसिनस्तत्राः संवत्सरं
प्रतीक्ष्य सहकारिणस्तस्योपकारायास्थियाजनं कुर्युः यद्विवा पित्रादेर्निभ
क्तसत्त्रफलस्योपकाराय पुत्रादयो याजका इति कर्काचार्यास्तु एवमाहुः।
याजयेयुरित्यत्र प्रयोजकव्यापारेण प्रयोज्यव्यापारो लक्ष्यते। अस्थीनि
यजेरन्निति यथान्यत्र निरवादस्थिपतियाजपेदिति तद्युक्तमिति मीमांसकाः
। अस्थ्यां पचेतनानां कर्तृत्वकर्तुरधिकारः तस्माज्जीवतामेवायं योगः। याज १२४

यिनारक्तदपेक्ष इति। अथेदं विचार्यते किं मरणात्संवत्सरेऽस्थि पञ्चः
किं वा कर्मापवर्गात्संवत्सर इति तत्र नियमकारणाभावादनियमे प्राप्त
स्याह। कर्मापवर्गादसंभवान्मरणस्य कर्मापवर्गात्कर्मसमाप्तेः सकल
स्य सत्रस्य गतस्य वा समाप्तेरारभ्य संवत्सरे वेतीति स्थिते। ननियाज्ययेषु:
कुतः मरणस्यात्रावधित्वेनासंभवात् यदि मरणमत्र संवत्सरस्यावधि
त्वेन गृह्येत तदा कदाचिद्द्वादशसंवत्सरादौ गवामयनादौ वा मरणे सत्र
मध्य एव संवत्सरः पूर्येत तदा वत्सरान्ते मध्य एवानुष्ठानमस्थि पञ्चस्या
पद्येत तच्चायुक्तं असंभवात्। अतो मरणस्य संवत्सरावधित्वेनासंभवा
त्कर्मापवर्गादारभ्य संवत्सरेऽतीतेऽस्थियज्ञ इति। अत्र शपि सूत्रान्तरे व्य
वस्थां दर्शयति। यदा सहकारिणोऽस्थियज्ञं कुर्वन्ति तदा कर्मापवर्गात्संवत्स
रे यदा त्वनुपुत्राद्यः तदा मरणात्संवत्सर इति तथा चोपग्रन्थसूत्रं। यद्य
हेनं सह ऋत्विजः कुर्युः सत्रान्तात्संवत्सरं गणपेयुः। ते हि दीक्षाप्रायणं तादृ
थ प्रायणं चान्तरेणास्थियजनं च पितामेधोक्तौ प्रेरन्नन्वेषाग्निहोत्रं हु
पतेन दर्शपूर्णमासाभ्यामिष्ट्वेन प्राणावमनयोश्चाग्निहोत्रहुत्याश्वदर्शी

देव.भा
१२५

125

पूर्णमासंवेष्टिं त्रीं निरूढान्स्वं चातुर्मास्यं ते विनियोगाद्‌ग्न्युपधारणमर्थां
त्रेदिष्टिनानलकर्मान्तरत्वान्नाग्निहोत्रवद्दर्शपूर्णमासेज्यमर्यत्वान्साग्नि
होत्रं गुरुस्यार्थमाग्ने वैगुरुस्याइति त्वभिधान्यवत्सांतुग्ध्वानुहूयादभिवत्सा
याइति यपुरोऽस्वइति दीक्षितः प्रमीतइति कृत्वा यावज्जीवमग्ने त्रिंत्या
नां निहृतिः। अग्निहोत्रं तु मन्त्रहोमन्यायेन क्षिपते च स्तात्र महूयमाना
नां लौकिकसेष्वग्नेष्वग्निगुरुस्यार्थत्वादिस्यनुयदकारवचनाच्च। केचित्तु हू
यमानान्धारयन्ते। संवत्सरस्थानियाजपेयुरिति वचनात्तद्वौकिकाग्न
विष्यन्तिमन्तयजीलस्थिय यद्गे पत्नीकार्यं करोति नेदिष्ठानुयजमानका
र्यमिति धूर्तस्वामिनः नेदिष्ठपदीक्षात्वन्यभावानलस्थितं योगादिति
यद्दीक्षाहाहोऽभवत्तिसंस्थितेनेदहनमस्थानिहरेयुर्यदिसत्रसंस्थितेसं
वत्सरं विहारमिंधानाजुहूतो यजमानाः समासे संवत्सरेऽप्योजिह्वामोऽस्थि
याजनीयइतिमानवे। अपरिमितस्तोमेन यजेत्। अनेनास्थियाजेनाप
रिमितस्तोमेन शास्त्रे यपरिमाणपनिक्रान्तस्तोमेनयजेरन्याजयेयुः
ज्योतिष्टोमेहि स्तोमपरिमाणमुक्तं। इह त्वपरिमितस्तोमो विधीयते वच १२५

नानतपक्षांतरमाह। त्रिवृद्बहिष्पवमानेन वासस्सदशमन्यत्। अथवा
बहिष्पवमानेन त्रिवृत्स्तोमकेन स्तुयुः। अन्यद्बहिष्पवमानव्यतिरिक्त
माज्यादिस्तोमजाते सप्तदशं सप्तदशस्तोमकं भवति। तांड्ये च त्रिषपिप
वमाने षुत्रिवृत्स्तोमः स्यूपते। त्रिवृत पवमानी स्युः सप्तदशा मितर इति।
अत्र शांखायायने विशेषः। स्तोत्रे स्तोत्रे स्थितुं भमुपनिदधाति मार्जालीये
भक्षांश्च नयंतीति। मैत्रावरुणग्रहान्ग्रहानग्रहीयान्। अस्मिन्नन्तरिक्षुप
द्रेग्रहीने द्रवायवादीन्मैत्रावरुणग्रहान मैत्रावरुणप्रथमानग्रहीया
त। प्रथमं मैत्रावरुणं गृहीत्वा अपृणं च कृत्वा कस्पविद्धृति समर्पयेश्वा
दें कृत्वा पवं गृहीत्वा सादूतनो मैत्रावरुणस्य परिमार्जजमन्तिसादनं
ततः शुक्रादिग्रहणं प्रकृतिवत्। प्रातिनिधिको याजमानं कुर्याद्दीक्षिणी
यां पुरुषसंस्कारान्शीवर्जं। अरत्नीयाजमानकर्तृत्वासंभवात् हत्रोपेक्षाक्षे इ
दं श्रुचने। प्रतिनिधिः प्रतिनिधिभन्नः पुत्रादिर्दीक्षणीयापुरुषसंस्कारा
न्स्नानाभ्यंजनाक्ष्यंजनपानादीन् आशिषश्चाबोदेवासो मयीदमित्या
द्याववर्जं यित्वा सर्वं याजमानं यमानकर्तृकं कर्म कुर्यात्। परिमाषायां तुम

वैगुण्यं नेः सततकर्मोत्कर्मयोगात्त्विति नेदिष्टाविषयमुक्तं सत्तु सर्वमपि याज
मानं करोत्येवं। तदंतु अस्थियागविषयमित्यपुनरुक्तिः। समासेष्टि
निसपात्राण्येतान्युपनिवपेयुः। समासेष्टिष्वगृह्ये अस्थिनिसपात्राणिपा
त्रासहितान्यरण्ये निवपेयुः। शरीरस्य पूर्वमेव दग्धत्वात्। अस्ति पक्षं नरा
विधानाद्यपुनरुक्तो हो वा युक्तत्वात्पात्राणां वाशब्दः पूर्वपक्षनिरासे। अ
यवाऽस्थां यात्रैरग्निभिश्च पुनर्दाहः कार्यः। कस्मात्पात्राणामयुक्तत्वा
त्। अर्द्धापि पात्राणां शरीरेण सहायुक्तत्वात्। पात्राणां हि आहिताग्नेः
शरीरेण योगः श्रूयते। आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति। वि
शिष्टयोगश्रूयते। जुहूं घृतेन पूर्णां दक्षिणे पात्राणां वादधीनास्यादेः। त
थास एष यज्ञायुधी यजमानः स्वर्गं लोकमभिप्रयन्देवैरभियुज्यत इत्यवि
समस्तपात्राणां योगो द्वारापि संस्कृतो नास्ति। अनस्तत्संपन्ने पुनर्दाह एव का
र्यः। अथवायुक्तत्वात्पात्राणां। पात्राणि हि प्रतिपत्त्यायुज्यंते दक्षिणह
स्ते जुहूमित्यादिद्वितीयाविभक्तिश्रवणात्। यद्यपि आहिताग्निमग्निभि
र्दहन्ति यज्ञपात्रैश्चेति श्रूयते पात्राणां दाहे करणतापि श्रूयते। तथापि ते

षां हस्ताद्धोसादनं प्रतिपत्तिरेव बह्वीनां षां तन्निर्दिष्टं स्यात्। ततः सादने पात्रा
णां प्रतिपत्तौ सिद्धायां पश्चात्प्रतिपादितानामेव पात्रेष्वेतिदाहे करणता
पि भवतीत्यविरोधः। तस्मात्पात्राणां प्रतिपत्तिरूपेणैव संस्कारेण युक्
त्वात्तेषां तस्याध्वक्सं १२ स्य तोपो माभूदिति पुनर्दाहो भवत्येव। अनए
वन स्वस्य पत्रस्य पुनर्नोपपत्तिरिति गम्यते। अनाहितमेव तन्निमित्तं भ
वतीति ननु तथापि दाहः कुतः साहनमात्र हि प्रतिपत्ते निर्ह्रतेरिति। सस्
। शरीरादग्धस्य रूपेण पात्राणां प्रतिपादनं अपेक्षते पुनर्दाहं मदग्धं तच्छ
रीरवमिति याज्ञिकाः। ततः संचयनादि। ततः पुनर्दाहानन्तरं संचयनादि
अस्थिसंचयनप्रभृति सर्वमौर्ध्वदेहिकं स्मार्तं भवति २३ उत्खां चेद्धुत्वा
क्लियेत तस्योपकरणमाहिताग्न्यात्वात्तदग्धानेदिष्ट अग्निचित्वातमस्मा
अस्मुदिदिशत्येके। पूर्वं हि साग्निकानग्निकानोतिकानं ग्निकानग्नि
काहर्गणसाधारण्येनाग्नौ षोमीयादारभ्यादीक्षितमरणे उक्त मिशामि
त्राहुतिनिर्दिष्टं ज्ञायते। ततः प्रभृतिश्रामित्रस्य सम्भावान्। अत्र चोत्खां
बिभ्रतन्निति निर्दिष्टा त्साग्निचित्यहर्गणे न कृयजमानके दीक्षासु दीक्षि

देवभा १२८ त्समरणे दृह्यमुच्यते इति निजायते। चेत् पदिवुखांश्च न त उखाधारणं नुर्वं
न्दीक्षामध्य एव कश्चिद्दीक्षितोग्निं यजेत तदा तं मृतं सोपकरणं अग्निपा
त्ररूपोपकरणसंयुतं आदितान्या हृता मृतस्याहिताग्नेः संबंधिन्या
इति कर्तव्यतया संदीपनवत्यधिश्रयणादिकया दग्ध्वा नेदिष्ठाम तस्य
127 पुत्रो भ्राता वा अन्यो वा ऋत्विक् संबंधी भ्रातृपुत्रादिर्वा अग्निचि
त्यामग्निचित्संस्कृतुमारं भमृतिसमाप्त्यंतत्वकृत्वा तं क्रतुं तस्य क्रतोः
फलं अस्मै दीक्षामध्ये मृतायानुद्दिशेद्दानरूपेणेत्स्यस्य तत्फलं दद्यादि
त्येके आचार्याः कथयंति। यद्यग्निपतेरेव तमग्निनिर्हृत्यमश्वाग्नि
मिरितरे यजमानी आसतेइति श्रुतेः। तेकोचेत् कचिल्लोया न्ते तो र्थेन निर्ह
त्या हार्येणानाहिताग्निं दहे पुररण्योरग्नी समारोप्यते आसाने न निर्हृ
सनिर्मथ्येन हिताग्निभिस्तिलाद्याः पनः। अत्र वासुदेव कृतं व्याख्यानं। सा
ग्निचित्येक श्चिन्सत्रा यथुखां धारयन् ध्रियेत तं खपात्रैः संदीपनवत्य
धिश्रयणादिनादग्ध्वा नेदिष्टीत स्मारध्वमग्निं चित्वा सत्रसमाप्त्यं तेन त
स्मा अस्य फलमित्येक इति। अत्र सत्रार्थसाधारणी कृतेभ्यो ग्निभ्यः ए १२८

केद्दे शंम्तस्य भागभूतमाहायतस्याग्निभिः पात्रैश्च दाह८ कार्यः। इत्य
कृतस्य गार्हपत्यस्यानुमन्त्रेणारणिभ्यां मेथनं नागार्हपत्यपक्षेनुगा
र्हपत्यः इत्ययोगेवात्तदेतरयोरंशं गृह्णीयात्। अत्रापि पूर्ववत्कालाहुतिवा
चनेएवभवतएव। कर्मफलासंभावात्। नैतदेवं। यस्मादग्निचित्यं क्रतु
मुपक्रमम स्य पर्वर्गपर्यन्तं होत्वा तस्यालं मतापानुविशेदिति यत्पू
र्वमुक्तं। तन्न कस्मात्। कर्मफलासंभवात्। कर्मफलस्यदानासंभवात्। न
हि कर्मफलदातुं शक्यते अस्यामूर्तत्वेनानुपादेयत्वात्। नेननेदिष्टिना
रवेष्टाग्निपुरस्कारेणनद्धमेणानुष्ठितस्य साग्निचित्यस्य साग्निविभस्य क्र
तोः फलं नेदिष्टिन एव। तस्मादयं पक्षोनुपपन्नः। उपक्षीक्षारवेष्टाग्निपुन
रवनिकृतं नाम्नां ह्लादनांतं८ सान्निपातिकं नेधूयहवमिष्ट्वाग्नाल्ल९:
स तेन। उपदीक्षितेनेदिष्टीरवेष्टाग्निपुरस्तानग्नीन्विहृत्य नेष्टाग्निपुनरव
निकृतं नवादिनवनिकृतं नमारभ्यो ह्लादनांतं दीक्षितो यं ग्रासमणइस्ये
तस्मिन्नेषां तेषां सान्निपातिकं सन्निपत्योपकारकं कर्मकृत्वानेष्टपूर्वं दीक्षिते
धूयहवमिष्ट्वा दीक्षिता उपहूय ध्वमित्येवमनुज्ञां प्रार्थयितव्याग्नीन्संस्र

दे०व भा अ जेत। अग्निससंर्गं कुर्यात्। ततस्तेन सह यजेरन्। अत्रायं क्रमः। पूर्वम
१२८ ग्न्योः समारोपः। उदकसानं। शालास्तंभप्रदानं। मथनं। विहारः। दृष्टा
ज्ञानं वा। अप्सु दीक्षादिप्रपादनांतं नदीक्षणीया। नवनीतेनाभ्यंजना
दि प्रयाहनोनं। ॐ क्रमेण होमो न भवति। कस्माज्जिनादिदुग्धादनप्रे
128 षांतं॥ ततो दीक्षिताउपहूयध्वमिति प्रार्थना। ततोग्निसंसर्गः। उपहूय
त इति प्रत्युपहवः। अनाहिताग्निश्चेत् यवेत्येके वैश्वानरं निर्वपेद्
स्याग्निभिरन्यैयाजयेयुरिति वचनात्। चेद्यदि अनाहिताग्निः पदी
क्षाते दिक्षास्मात् तदाते सेवत्रिणाग्निसेवनत्वनिहुंते नायुष्ट्वादनांतं
करोती त्येकेकथयंति तदा चसत्रांते वैश्वानरं निर्वपेत वैश्वानरं चरुं कु
र्यात्। कस्मात्। यस्याग्निभिरन्यं योजयेयुर्यो वा जेलेतिवचनात्। तस्मा
न्याग्निभिर्यजनरूपस्यानिमित्तस्याज्ञानत्वात्संत्रांते तं वैश्वानरश्चरुः का
र्य इत्यर्थः। योवायजेनेत्स्यापमेव विषय इत्यभिप्रायः। तथाचाश्वला
यनः। यद्यनाहिताग्नयः स्युः गृहपतेरेवाग्निषु यजेरन्निति। नाशक्तेः
। यदुक्तं सत्रिणामग्निधेवा नाहिताग्निः करोतीति। तन्न। आशक्तेः। नहि १२८

वं। श्रू. यत इति। अथवा अनाहिताग्निर्नैर्दिष्टो न भवति। कस्माद्श्रु-
तेः। तस्य गृह्याग्न्याहिकयाकर्मश्रवणात्। कृताधानस्यैव श्रौतकर्मण्यधि-
कारात्। अथवानाश्रुतेः। अनाहिताग्निनां स्मार्त्ताग्निषु नावेनिहंत-
तादिके कर्मणि कृते सत्त्वां नैवैश्वानरनिर्वापः। कर्तव्य इति तदुक्तं तन्नाय
दितत्त्वान्यादिषु कर्मानुष्ठाने उपयातः स्यात्। न हि अनैवैश्वानरविधा-
नेनैमित्तिकतया श्रूयते। न श्रूयते। अतो श्रुतेरश्रवणात् तत्त्वान्याग्नि-
षु यजने वैश्वानरो भवति। नन्वेवं न हि विषयाभावात् हि वैश्वानरविधान-
मर्थकमेवेन्यत आह। आपदि वैश्वानरः। देशभंगादावापदि आप-
त्काले व्याकुलतमा एकगृहे शनिहितेषु बहुनामाग्निषु ज्ञात्वा परकीये-
षु यागानुष्ठाने उभयो वैश्वानरः। तेन कृताधानस्य परकीयस्याप्युपलक्ष-
णं। अकृताधानस्य पुत्रादेरिति। किंच। आदधीतेत्यामने पदाधातुरेवा-
धानफलेन भवितव्यं। कर्मयोगत्वात्तानीनां तत्फलं। अतोस्येनाहिता अ-
स्यस्य कर्मन साधयंति। तस्मादनाहिताग्नीनाम ग्रामधिकार एवास-
मानजनपदसर्ठ. सवैमहा एतत्प्रातरनुवाकमुपाकृत्यपूर्वः पूर्वं कर्मप्र

वर्त्तयेत्। समाने एकस्मिन् जनपदे देशे संसवः। समानजनपदसंसवः
।संसवशब्दार्थमाह अंगेत्यापनः। ज्ञानविषये विद्विषाणयोः तुल्ययोरह्नोः
संनिपातेन संसव इत्याचक्षत इति। अस्यार्थः। क्रियमाणकर्मज्ञानगोच
रे देवयजनानन्तर्ये विद्विषाणयोः परस्परं द्वेषं कुर्वाणयोर्यजमानयोः तुल्य
योरह्नोर्यत्संनिपातनं संसंनिपातः एककालोपनिपातः पदार्थानां ते संभ
व इत्याचक्षते याज्ञिकाः। तत्र समानजनपदे संसवे क्रियमाणकर्मज्ञान
विषये परस्परं द्वेषं कुर्वाणयोर्यजमानयोरेकस्मिन्नहनि तुल्ययोः संनि
पाते सह भावे सति महारात्रे अर्द्धरात्रे प्रातरनुवाकमुपाकृत्य तेनापेक्ष
या पूर्वः पूर्वः प्रथमः प्रथमः कर्म प्रवर्त्तयेत्। सर्वकर्म सत्वरं प्रथमं प्रथ
मं कारयेत्। प्रकृतौ हि वपसावदनात्पूर्वं प्रातरनुवाकोपाकरणं विहितं
इह तु वचनान्मध्यरात्रे कर्त्तव्यं यदा द्वौ यजमानौ मिथः प्रीतिरहितौ वसं
तादिके यागकाले वर्षान्तरादि प्रतीक्षमाणावतिक्रान्तं मन्यमानौ स्वाधि
कारप्रवृत्तौ एकस्मिन्देशे गिरिनद्यादिव्यवधानं विना यागार्थं सोमं अस्मि
न्काले सुनुतः। तदा समे त्यसवनात्तत्संसव इत्युच्यते। स चोभयथा संभवति

कदाचिद्द्वयोर्यजमानयोरेवंविधयोर्जोलनोरेवाकाला।त्तिक्रमरक्ष
णार्थं सहयज्ञारंभो भवति। कदाचित्परस्परं यज्ञारंभमजानतोरपि सुर
त्यारंभात्प्रागेव सहारंभज्ञानं भवति तदाहृद्दं नैमित्तिकमनुष्ठेयं तत्र द्वे
स्त्र्यते। यदि सोमऽसुतौ स्यातां महति रात्रेः प्रातरनुवाकमुपाकुर्यात्पू
र्वो नं चंपूर्वश्छंदांसि पूर्वो देवता हृत्के पूर्वैभिषुणुयुरिति। हं तेयजमाना
नां नगृहं जयन्ति। स्वीकरोति। एनं सुपूर्वो हृत्के नकृतिव त्यस्य प्रशंसार्थमेवोक्तं
अननुपूर्वं ताचिकीर्षया यतो द्वयोरप्ययमुपदेशः तत्र महानिशि च प्रातर
नुवाकोपाकरणमुभाभ्यामपि यदा क्रियते। तदोभावपि वाग्गादि परि
ग्रहं कुरुत इति। कः कस्य पूर्वो हंनृकरमि न ज्ञायते। यदा चैकेन पूर्वंतरं तदु
पाकरणं कृतं स्यात् तदाऽपरस्य तदकरणमेव प्रसज्येत। तान चैतदुक्तं। देव
तादिपरिग्रहं च सोऽन्ययापि पूर्वप्रयोगस्तावक न्याय्यो यपतो ह्यस्याप
रित्यागकल्पनया अनुविनत्वादिति। एतदेवाहोपरंथकारः महतिरा
त्रेः प्रातरनुवाकमुपाकुर्यात्पूर्वो वा च पूर्वश्छंदांसि पूर्वो देवता हृत्के पूर्वोभि
षुणुयुरिति न तां पूर्वचिकीर्षामन्ये तेवं नुनकाम्य स्वयमनवतीति। एवंच

यतः पूर्वकरणस्यात्रनचिकीर्षितता। तेनाहं गणोष्वहरहरपि संसवेसति नैने
मित्तिकमावर्ततेतस्मद्देवादीपा तेशास्रापेक्ष्यकृततया दृष्टस्य वंधागादि परि
ग्रहोद्द भावादिति। एतदयुक्तमप्रयुक्तमं तत्र त्वहमहर्गणेषु स्यादि
तिप्रक्रम्य कृत्वा पूर्वेवेद्यां सम निरिति।सुसमिद्धहोमः। अतिशी
घ्रंकर्त्तव्यम्हिरपि सुसमिद्धे अतिशयेन संदीपे एवाग्नौ होतव्य :
।सुसमिद्धे हो तपमग्निर्वेसर्वादेवताः सर्वा एव देवताः प्रत्यक्षं जुहोती।
ति तां च श्रवणात्। सर्व छोतरं वकुर्यादिष्ट त्। इच्छन्परकीयया गापे
क्षया ग्रकीयया इसच्छो तरं संख्याधिकं कुर्यात इच्छन्नार छोमेवसं
च्छंकुर्यात्। तयाहि। यदीतरेणाग्निहोमः प्राग्ध्वमहास्याग्नि होमं
मंत्रं यं यत् कुर्यात्। यद्यग्निहोमसदसी स्यंयद्य छनृत्तदेवोड
शिनं। यदि षोडशी नदातिरात्रं कर्त्तादयल्क इच्छन्नित्यनस्य हम
गिमेनं सत्रेणयोमस्यं तिरइच्छन्नू यद्यवनीयतिपाहि तेवं। तेनतन्मते
संख्याधिकं नियमेन। इष एवतामतिपद्दिकल्प्येनेति। तद युक्तं। मल
भूततनां उपश्रुति विरोधानुशाखांतरविरोधाच्च। तत्राहि संछ्याधिका

130

स्यैव विकल्पोऽहस्पतेन प्रतिपदः तथा च ताण्ड्यो यदीतरोऽग्निष्टोमः
स्यादुक्थ्यः कार्यो यद्युक्थ्यो ऽतिरात्रयोर्विभूयोन्यत्क्रतुः सहस्रस्य प्रियो
भूयसैवैषां यज्ञक्रतुनेष्ट्वं हं क इति। तथा पक्षान्तरमपि तत्रोक्तं। अथो
खल्वाहुः द्वादशाहस्य वैपरः पर्यायमेवाग्रे यज्ञक्रतुमारभेत न तस्माद्गे
यादिति। तेति रिसहस्रोऽसेस्वाधिकं कुर्यात् स्यां वा सरस्वत्यां भूयसीर्द
द्यादिति। दक्षिणाभिर्वा स एव वरीयानिति। तथा च मानवे यदि समा
ने जनपदे विद्विषाणयोः सुत्याः संनिचेयेयुः पूर्वोऽग्निष्टोमः परस्योक्थ्यो
कुर्याद्यद्युक्थ्यः षोडशिनं यदि षोडश्यतिरात्रं यद्यतिरात्रो विश्वजि
तमभिजिं वा सर्वस्तोमं कुर्यादिति शांखायनः। पूर्वेद्युः संस्थाप्य परस्
त्रात्संस्थां कुर्वीत अतिरात्रं कुर्वाणो बुद्धिरात्रं द्विरात्रं कुर्वाणे त्रिरात्रं
ततः स्यां वा संस्थायां भूयसीर्दक्षिणा दद्यादिति अत्र तस्यैवाह्नोऽभ्यासेन
द्विरात्रकरणं विशेषोऽनुपदेशात्। तदा चान्यः सोमस्तेन व्योहरणं तत्रा
ऽन्तत्रनुक्रमणप्रयनादीनि सांनिपातिकानि कार्याणि सहोत्रा एप कृत
त्वा सोमस्यैव केवलस्य प्रयनं एवं यावदर्थं कर्मनेवात्राहर्गण धर्मो न व

ति। निमित्ते प्रतिकर्मातन्त्रत्वात्। तस्मिंश्च यजुरंतं च पूर्वं पूर्वमहरंगत्वात्। इ
ति शांखायनमतम्। अह्न एव तत्र प्रतिपत् अत्र संसवेह्न एव तीह प्रत
श्रुत्युक्तो पवमानत्रयं हवासु नह्यत्र द्विका प्रतिपद्भवति। पवमानस्य प्रथ
मा ऋत्विक्प्रतिपदुच्यते। प्रतिपद्युते मार्भ्यते न येति प्रतिपत्। अह्न एव
ती प्रतिपदं कुर्यात् इति तांड्ये श्रूयते। अत्र प्रतिपद्दो विकल्पात् श्रवणात्
। अनन्तपादेच्छि त्रिस्य पूर्वस्य त्रेणैव संबंधः। अनुसवनं वा। अथवानुसव
नं सवने सवने प्रतिसवनं त्रिष्वपि सवनेष्वह्न एव तीप्रतिपद्भवति। पव
मानानां प्रथमा ऋग्भवति। अथो खल्वाहुः सवनमुखे सवनमुखे कार्ये
ति तांड्यश्रुतेः। बृहद्रथंतरयोः समुच्चये संसवे सोमो बृहद्रथंतरसामो
भवति। उभे बृहद्रथंतरसाम्नी अह्न होत्रा सम्मिते तौ रश्रवसे माध्यंदिने
पवमाने तत्र पवनश्रुतेः। तुरश्रवा नाम कश्चिद् ऋषिः। तेन दृष्टे सामनी तौ
रश्रवसौ। ते अत्र संसवे माध्यंदिने पवमाने प्रयोज्ये अनुक्तेः। तत्र पवमान
श्रुतेः। तत्र माध्यंदिनपवमानं प्रकृत्य श्रवणात्। आभीकमभिनिध
नमाभीशवानि चैके। एके आचार्या आभीकमभिनिधनमाभीशवानि १३१

ऽनमामीज्ञावानिति यसामानिमाध्यंदिने पवमानेति आवयंति
।प्रातःसवने जुहोति संवेशायोपवेशायेति मंत्र एष सहगृहीतमाज्य
मध्वर्युराहवनीये जुहोति। स समर्मानिर्देशाद्गायत्रीत्रिष्टुप्जगत्यः प्रसुहृ
त्यस्मात्सायगाहुतिहोमइतिवासुदेवः। त्रिष्टुभे जगत्या इत्युत्तरयोः स
वनयोः। उत्तरयोर्माध्यंदिनं सवनतृतीयसवनयोरंते संवेशायेत्य
स्मिन्होममंत्रे गायत्र्यै छंदसइत्यस्य स्थाने त्रिष्टुभे छंदसेभिभूत्या इ
ति माध्यंदिने जगत्यै छंदसेभिभूत्या इति तृतीयसवने विशेषः विहव्या
यस्य जनीय कयाशुभीयानि होता शंसति विहवशब्दोऽस्मिन्नस्तीति
विहवीयं ममाग्ने वर्च इति। सजनशब्दोऽस्मिन्नास्ति तत्सजनीयं। यो जा
त एव प्रथमो मनस्वानिति। कयाशुभेतिशब्दोस्यास्मिन्नस्ति तेन कया
शुभीयं। कयाशुभा सवयसः सनीला इति एतानि स्तृतानि यद्दोपदेशा
होता शंसति तथा च शांखायनः। कयाशुभीयं मरुत्वतीयं सज
नीयं निष्केवल्ये। विहव्यो वैश्वदेवमिति। मनोत्थः सूक्ष्मा ज्ञोद्दिनिष्क
प्रत्ययः विहवीयादौ शब्दे। सार्व्यामरणाभिछ्ठन्नः प्राजापत्यचौजु

देवमा अ हुयुः प्रातःसवनेध्वर्युर्माध्यंदिने होतोद्गाता तृतीयसवनेनुसवनं
१३२ ब्राह्मणाग्न्हपतिष्व। सदृशः सदृशस्य सखा। परकीयोः सखा। होताहो
नुऽ। उद्गातोद्गानुः। ब्राह्मणाच्छंसिणोः। यजमानो यजमानस्य। सखिसंबं
धिसाख्यं अध्वर्युर्होतोद्गाता तृब्रह्मगृहपतयः साख्यमरणे परकीया
यज्ञस्याध्वर्यादेः सख्युर्मरणे मिष्ठे तो वा छंतः प्राजापत्यं चरुं प्रजा
132 पतिदेवत्यं चर्वा प्रजापतये न त्वहिल्य नेया जुहुयुः तत्कालेहोमं कुर्युः
होमकालमाह। प्रातःसवने ध्वर्युः। अध्वर्युः प्रातःसवने आगंतुला
देतेइतरयज्ञंकारिणोध्वर्योर्मरणे मिष्ठे प्राजापत्यं चरुं सकृद्गृहीत
माज्यं हवनीये जुहोति। तथा होता परकीयस्य होतुर्मरणे मिष्ठे न्मा
ध्यंदिने एवमेव जुहोति। तथा तृतीयसवनाते उद्गाता परकीयस्योद्गा
तुर्मरणे मिष्ठे नेव जुहोति। अनुसवनं ब्राह्मणाग्न्हस्पतिष्व। ब्राह्मणाच्छं
सिणो मरणे मिष्ठे न गृहपतिर्गृहपतेर्मरणे मिष्ठे नु गौ अनु गौ अ
नुसवनं त्रिष्वपि सवने त्रिष्वपि सवने घं ते प्राजापत्यं चरुं सकृद्गृही
तमाज्यमाहवनीये जुहुतः। तथा च शांखायनः। अध्वर्युमतमिष्ठे स्या १३२

जात्प्राजापत्यामिष्टिमभिरध्वर्युः प्रातःसवनेजुहुयाद्धोतारं होता
माध्यन्दिने उद्गातारमुद्गातातृतीयसवने ब्रह्माणं ब्रह्मानुसवनं यज
मानो नुसवनमिति सर्वे मरणमिच्छंतः सर्वे नुसवनं सर्वेषामितरत्य
त्विक्करणमृत्विग्यजमानं मरणमिच्छंतः सर्वे यजमानकारूत्विजो
नुसवनं सर्वेषु सवनेषु तेसह हृष्टहीनमाज्यमाज्यमाहवनीये जुहुयुः
। तथा च शांखायनः सर्वाण्मनानिच्छंतः सर्वे नुसवनमिति । अनंतरि
ससवो गिरिभिद्यते न व्यवधानं न व्यवधानं घं नरं । तस्मिन्नंतरे नदी व्यव
धाने संसवः संसवनिमित्तं महारण्ये प्रान्तरनुवारूकमुपाकृत्य ससादि
कं न भवतीत्यर्थः । यत्र हृद्यौ वैरिणौ सह प्रारब्धयज्ञयोर्मध्ये व्यवधा
यिका नदी न भवति तत्र संसवो न भवति । परं सा व्यवसायिका नदी गिरि
भिद्यते । यदि हि घ्रुचित्प्रदेशे गिरिभित्तानि संज्ञा न भवति । गिरौ गिरौ कस्मि
श्चन महति पर्वते वैरियज्ञयोर्व्यवधानके संसवः संसवनिमित्तं न भव
तीत्यर्थः । स्वेगत् द्वे चापावंते प्रदेशमङ्गारयो गच्छति सरयाद्यः । तस्मिन्न
राथाङ्के अङ्गारथे नगं तु शाकेप्रदेशे यज्ञयो व्यवधायके गिरिनद्या

देव·मा
२३३
133

दिव्यवधानं विनापि वक्ष्यमाणदर्शनं भवः संसवनिमित्तं न भवति। सर्व
त्राद्विषाणानां अविद्विषाणानां परस्परं द्वेषमकुर्वाणानां सर्वत्र
गिरिनद्यादिव्यवधानं विनापि संभवः संसवनिमित्तं न भवति। एते
न परस्परं त्ते हवनात् बहूनां सहयज्ञं कर्वीतास प्येतन्नैमित्तिकं न भव
ती स्फुटं। विद्वेषेप्ययं वायुर्महान्समुद्र इति श्रुतेः। अविद्विषाणानां
पुयं द्वेषमकुर्वतां सर्वत्र गिरिनद्यादिव्यवधाविनाप्यसंभवः संसव
निमित्तं भवति। कुत एतत्। अयं वायुर्महान्समुद्र इति श्रुतेः। अयं
वायुः समुद्रं सदा द्वेष्टि शोषयितुमिच्छति समुद्रश्च सर्वदा स्नेहप
रस्याकिमर्यादां न ... न भवतीति ज्ञायते। नेति रिक्तत्वेव एकस्मिन्देशे
पि राज्ञो भेदे संसव उक्तः। तत्र समानस्य एकस्य जनपदं समानजनप
द इति विभूयव्यास्यर्थव्याख्यान्यां तराद्पमप्यर्थो लभ्यते शांख्या
यनः एवं स्यो वा विहरंति वायुराकाशश्चेति। सर्वस्य आपो नदी न
डागादिस्थाः संसवं विहरंति विच्छिंदंति। तथा वायुराकाशश्चेति स
त्रार्थः। सोमदाहे यथा स्वद्गतां तान् धारयेयुः सोमस्य दाहे स नियम २३३

याश्वं अध्वर्यादेयाद्यश्च कर्म यथास्वं वीक्षयामन्यपी भावः। हूतां
तानां। हूतस्य कृतस्य कर्मणो ताननध्वर्यादयो हययुः धारयेयुः मया
एतत्सदा थीं तरं मदीयं कर्म कृतमित्येवं चित्ते हढं धारणं अविस्मयक
रणं कुर्युः। तथा च तां ड्यो। यदि सोमममभिहे देहू हानध्वर्युः स्याश्येन
। सत्रा एयाहाता शस्त्राणि होता थाय यथा पूर्वं यज्ञेन चारयुरित्स्याः स्या
त्रायेत। सचिह्नानकुर्यात्। एतावत्कृतं एतावन्नेति कृता कृता विभा
गं जानीयात्। अन्यथा अग्निहाहानुलवघाविस्मरणात्। अवशि
ष्टत्यवुसमो यन्नंदः शकं स्यात् प्रतिनिधाय यथा पूर्वं यज्ञेन चरेयुः अ
य प्रशांते दाह नयेय याच्छानमागता। अध्वर्यु। दयः पूर्वेण सदृशं
य यथा पूर्वं साहश्येपन्यपी भावः। यथा ए वीं पूर्ववत् सोमा यहहरणवद
र्जुनश्येनहननादिकं प्रतिनिधाय प्रतिनिधिद्रव्यं संपाद्याभिसुत्याव
शिष्टेन यज्ञेन चरेयुः। कृतावरिसंयज्ञं समापयेयुः अथवा प्रतिनि
धाय सोमस्य स्थानेर्जुनादिकं प्रतिनिधिं कृत्वा यथापूर्वं पूर्वमार
ब्धस्य यज्ञस्यानतिक्रमोपयापर्वं पूर्वारब्धेनैव यज्ञेन चरेयुः। तं मार

ध्वंप्रयोगं संमापयेयुः। पंचगादत्वा प्रागहादश्याः पुनर्यजेतुः अस्मिन्प्र
योगे पंचगादत्वो न दक्षिणास्थाने पंचैव गा दक्षिणां दत्वा नं यज्ञं प्रव
र्तयां तेत्कृत्वा ततः प्रभृति द्वादश्या रात्रेः। प्राकृ यमसमासे ईयाद्वाद
शासंख्या पूरणी द्वादश्या रात्रि तस्याः प्रावृत्युनर्यजतः स एव यज्ञः पुनः
कार्यः। अन्नगोरेव संख्यासंबंधा द्विरण्यादीनां दानं भवत्येवातोऽन्नो
अथयथा पूर्वं यज्ञेन चरेयुः पंचदक्षिणां दे याइति प्रकृत्याच नथ्या
दुहेत्यपुनर्दीक्षेत नत्र नदघाघ द्वाद्वाप्संन्स्या पुरा द्वादश्याः दीक्षे
नयाद्वादशीमतिनेयेदंनद्वीयेनेति निमित्तिकं नहीयेन कालानिप
श्याकार्यकरं नस्यादित्यर्थः। न तनदघाघ पूर्वस्मिन्नाप्संन्स्यानान्त
नः पुनर्यज्ञेन दक्षिणात्वेन दद्यात् पूर्वस्मिन्प्रयोगे हास्यंन्स्यान कृ
न्त्वा कृतु दक्षिणामित्यर्थः। अत्र सोम॰॰॰॰॰॰॰॰सोमः सोमे द
ग्धे सोमांगे वा यथापूर्वं पुनः संस्करणं सोन्यहनि सोमे दग्धे कृ नोनां त्रा
त्वाग्रहीन ध्वर्युः स्या त्रायो सो त्राण्युहानात्राल्पानि होताय यापूर्वं
यज्ञेन चतुरेयुः पंच वर्गां रन्दद्याने पुदक्षिणाकर्मक्रियेतावभृथं गत्वा

134

पुनरुद्देस्यपुरस्यपुराद्वादश्याः पुनर्दीक्षेतय द्वादशिमतिनयेद्व
हूयितप्रायश्चित्तकर्मेत्याचार्या उत्तरस्मिन्यक्षेय जेनेति लोगाक्षि
स्तत्रनादक्षिणाद्याघाः पूर्वस्मिन्दास्यन्त्वनीतिनीतास्तु चेद्वार
नेनदद्यात् प्राक् न्सोस्यान्सोमेदग्धे पंचंवराण्द द्यान्तात्रपुनर्यज्ञो
ऽहर्गणे सोमेदग्धे पंचवराण्द द्यान्तात्रपुनर्यज्ञेऽहर्गणे सोमेदग्धे
पंचवराण्देकस्माद्वैसं प शेपदंनेरेणाहनी सोमेदग्धे पंचवराण्द द्यान्त्रा
त्रोकस्माद्वैसंप शेपदितिमानवोपदिराज्ञाजिदत्येतमहानध्वर्युः
स्याज्ञायेन्सोत्राएपुरुहातानाशस्त्राणि होतायथयज्ञेसंभस्यानुपूर्वेवेष्टो
रन्येवदक्षिणाद्दतिसंख्यापयेन कामयेतनेन पुनर्यज्ञेतनत्वय
त्कामयेततनदाघाद्दक्षिणोत्वदास्यां न्स्यानस्याध्वर्यवेवरंदद्यास्तु
एद्वादश्यादीक्षेतनतएवेनमतिजोयाजयेयुरिति।सत्रेप्यावेशे पात
।एतत्सोमदाहनिमित्तंप्रायश्चित्तंसत्रेपिनवतिनु तोविज्ञोपातभि
मितावित्रेपातसोमदाहरूपस्यनिमित्तस्यसत्रेप्यविशिष्टत्वादितिल
र्थः।ननुसत्राणामदक्षिणत्वानत्रपंचगाद्दत्वस्येतत्कथमित्याशंक्या

देवभाअ हा । दानं प्रायश्चित्तसंयोगात् । सत्रेऽपि पंचगादत्वेस्येन हानं भवति
१३५ । कुतः प्रायश्चित्तसंयोगात् । यस्माद्देन हानं प्रायश्चित्तं संयुक्तं । तद्धि क
र्मणो वैगुण्यपरिहारार्थं । कर्मवैगुण्यं च सत्रेऽपि रययेक्ष्यत एवा त्र
तः सत्रेऽपि नैमित्तिकं दानं भवतीति पूर्वः पक्षः । सिद्धान्तमाह । न चाद
135 क्षिणत्वात् । सत्रे दानं न प्रवर्तत एव कुतः सत्राणामदक्षिणत्वात्
। यत्पुनरुक्तं प्रायश्चित्तसंयोगादिति तत्रोच्यते । प्रायश्चित्तमपि सत्रा
णमेव युक्तं । तस्य लक्ष्म पुनराहारः सत्रेऽपि यस्मिन्नहनि सोमदाहो
जातः तस्यैवाह्नः पुनराहारः पुनः प्रयोगो भवति । तुरेवकारार्थः । तस्यै
वैन्यर्थः । न सकलस्य सत्रस्य आहीने पुनः यस्मिन्नहनि सोमदाहो
भवति तस्मिन्नहनि पंचगादत्वाल्पस्यैवाह्नः पुनः प्रयोगो भवति । अ
न्योऽपर्यायः सत्रे विशेषः पंचैव विभ्रंशानं भवति । उक्तातुरपक्षे दृष्टः सो
मापहरणं सोमातिदहने सोमातिपवनं क्रतुविलोप एवं वपं च मरणे
षु हि पुनः सत्र एतनातः सयुक्त उ खलु पुनः सत्रिविभ्रंशेन यस्मिन्
ह्नि वयवजक्रतो विभ्रंशे तस्यैव तस्य प्रायश्चित्तिरिति भवतीति कि १३५

यत्तिकालात्ययेविलोपो भवतीतियत्राग्निहोत्रं जुहुति अन्योन्यस्छो
पनमापद्येतेयत्रदर्शपूर्णमासौयत्र वापि कर्मासु स्वाहः परस्मात्कु
र्छोपमापद्येतेका होवा परमादिस्वाहरिति ब्रह्मा प्रायश्चित्तानि जु
हुयादनादिष्टानिब्रह्माविलिष्टं संदधातीति श्रुतेस्त्रिवेदसंयोगा
त्त्रिवेदसंयोगाच्च। अनादिष्टानिप्रायश्चित्तानिब्रह्माजुहुयात्
।प्रातिनिमित्तमविशेषनामोच्चारणं विनापि सामान्येनकर्मणोवि
हितान्यथाभावमात्रेविधीयंतेतान्यनादिष्टानि।यथाव्याहृतिहो
मोऽग्न्याधेयेसोमेसोपयालौवैकां यथाकालं जुहुयादीनि।नये
लोभुवर्णोलाः।नकेनाअभिमन्त्रेतानाहृयत्रास्कन्दनेजुहुयात्।
ज्ञोपिचेतुर्यादित्यादिवनिमित्तविशेषतोनामोच्चारणेपूर्वकमा
दिष्टं।अत्रएतानिविशेषतोनादिष्टनिमित्तत्वादनादिष्टानिब्रह्मा
जुहुयादितिनुनएत्वत।ब्रह्माविलिष्टं संदधातीतिश्रुतेः कर्मणो
यंछिद्रंछिद्रंनभूतनष्टसोसंदधातीतिशास्त्रांतरेश्रवणात्। एवशा
खायामिति।तद्वेदैनैवग्वेदंनिपद्यतियजुर्वेदेनयजुर्वेदं।सा

देव भा अ
१३६

मवेदेन सामवेदं स्य यथा पावीण्येन पर्व संदध्यादेवं ह्येवस सह धा
न्तिय एताभिर्भिषज्यतीति मुक्तात्तस्माद्देवं विदमेव ब्रह्माणं कुर्वीत
तानेवंविदमिति श्रुतेः। न यावन्नाह्मणा वा ऋत्विजो भिषज्मत्तत्र ब्रह्मा
संदधातीति एतद्ब्रह्मा वै देवो यज्ञं भिषज्यति सर्वै ह्येवो यज्ञं प्रति संद
धातीत्यत्र मैव जुहुयाच्छ्रद्धेति च श्रवणात्तान केवलं संदधातीति
136
श्रुतेः। किं तु त्रिवेदसंयोगाच्च। अनादिष्टानां त्रिवेदेन ब्रह्मणा सह
संयोगाच्चानादिष्टानि प्रायश्चित्तानि ब्रह्मा जुहोतीति। त्रीन्वेदानधी
ते वेद इव त्रिवेदः तदधीते तद्वेदेत्यण। तस्य हि गोलुगनपत्य इति लु
क। त्रिवेदेन इति संयोगः। संबंधस्त्रिवेदसंयोगः। वेदविहितकर्म
णः कृत्स्नाकृत्स्नप्रत्यवेक्षणं हि ब्रह्मणा कार्यं न च तदेवकर्तुं शक्नोति
यदा वेदत्रयाध्यायी भवति अतस्त्रिवेदो ब्रह्मा। उक्तानां महाव्या
हृतिकालाहुतिरूपाणामनादिष्टानां प्रायश्चित्तानां त्रिवेदेन ब्रह्म
णा सह संयोगः। अयमत्र महाव्याहृतीनां नावता। यदेव अध्येषि विद्या
द्यायै शुक्रं तेन ब्रह्मत्वमिति। कालाहुतीनां च नाब्रह्मैव जुहुयादिति। १३६

तेनता न्यना दिष्टानि ब्रह्मणा होतव्यानि। चकारेणानुक्तसमुच्चये। तेन ब्रह्म
ण्यमन्यत्र व्याहृते असमर्थेष्वानरहिते च तनुदन्तुह्वानो न्योपि जुहुयात्
। यदि तु ब्रह्मा न विद्यात् तदपि यएव कश्चविद्यान्स जुहुयाद् ब्रह्मणा वामं
न्मत्र त्वणा तिस्रहृद्गतिश्च जन्वा त। हिरण्यासोध्मायपरिसमाप्तिज्ञा
पकार्थः। मानवसूत्रे चाप्तिए त्रेणा न्निपर्यपि पुस्तूर्योदयश्चं कायां विशे
षः। सूर्य्योदय विकल्प। पूर्वा वतीभिर्न सुपुत्रावतीभिरभिमृयुमूयो स्रा
भिर्वा न्त्रीडं वाग्निहोमसामनुर्यादि ति सुतेपावतीभिरभिमृयुस्ता
वसूतीभिर्नत्तपुरस्तीयो क्षणाभिर्वा रवारं वाग्निहोमसामनुर्यादि
सर्वैः पर्यायैरत्वानमभिमृ छेत्संवद त्रामि हीं त्रैल पुः पंचभिरित
रेभ्यो यदि ह्याम्यां होते मैत्रावरुणा पवान्यतरेण ब्राह्मणाछंसिने
च्छावाकायवान्यतरेणा पदोके न पंचभिर्हीत्रैलपुनिस्मिभिस्ति
सृभिरितिरेभ्यो यस्याग्नि ने शप्यमाने सूर्यो नोदियाद श्वं श्वेतं रु
क्मप्रतिमुक्तं पुरस्तान्नयेत्तदनुग्निमन्ववस्तपयत्यो हिरण्यं बहुरू
पमातमेत्त सोयोजि; श्वेतउपालंभ्यपुपांश्रुदेवत इति। स्त्रापयते

बस्त्रेऽप्यतदेवमेवास्तिहृयांकविशेषः। एकएवसोऽर्यपशुः सर्वा
वादाश्वानयोरनुब्रूया ह्यावन्स्योऽदृश्यतो अस्मिन्पक्षेन सोऽर्यस्मा
लं मृइति। शांखायनेपि। अस्कनेवेस्यर्यायेरभिव्यक्छेन पंचभिःस्तो
मेर्हीत्रवकेभ्यः एकवनेस्तोत्रियानुरूपांछस्तोछमुखानां जगतीनां
वेहृहेकेसेपुर्निस्पाः परिधानीयाः न्हस्मोर्वाप्रथमेः पर्यायेहों
त्रैवाप्रथमानांपर्यायाणांमैत्रावरुणायब्राह्मणाछंसिनेतुमध्य
मानामछावाकायोत्तमानाम्नीव्यापिन्नंशास्त्रिज्ञातानीति २४
इति श्रीविरंचिविरचितसंप्रदायरुछपतिविशक्तुकन्महायाज्ञिक
श्रीश्रीप्रजापतिपुत्रेणयाज्ञिकश्रीदेवभट्टेनकात्यायनसूत्रेव्या
ख्यानेपंचविंशतितमोऽध्यायः समाप्तः श्रीरामजी श्रीरामजी

137